नं० ५४५१ — घ

नरपतिजयचर्या

पत्राणि १६७ सम्पूर्णम् ।

ज्योतिषम्

नं ५८४५१-च

नरपतिजयचर्या स्वरोदयः (सम्पूर्णम्)

पत्राणि १६६ (ज्योतिषम्)

नं० ७५४

991

सं ६७४ क
नरपतिजयचर्या
१९१८ पत्राणि
लिपि काल सं० १-१९८० वि० ज्योतिष

अथनरपतिकविःस्वदेशकुलख्यापनंकरोति विद्या
लयेमालवसंज्ञदेशेधारापुरीरम्यनिवासवासी नाना
गमज्ञोनृपलोकपूज्योबुधःप्रसिद्धोनरदेवनामा स्वर
चलफलवेत्तादेहतत्वेषभिज्ञोविदितशकुनशास्त्रतं
त्रमंत्रप्रवीणः कलितगणितसारासारचूडामणिज्ञोन
रपतिरितिनामातस्यपुत्रोबभूव ज्ञानेयःसर्वज्ञोनृप
गणपूज्यःसरस्वतीसिद्धिः तेनकृतंशास्त्रमिदंप्रचुरगु
णंदोषरहितंच योवेत्तिशास्त्रमेतद्गुरुमुखकथितंसद्गु

नरपतिरितिलोकेख्यातनामाभिधास्तेन
रपतिजयचर्यानामकंशास्त्रमेतत् ३
कृतेजयार्णवंनामत्रेतायांब्रह्मयामलं
द्वापरेविजयाख्यातंकलौचैवस्वरोदयः ४
ब्रह्मयामलमादौस्याद्द्वितीयंविष्णुयामलं
रुद्रयामलमाख्यातंचतुर्थंचादियामलं ५
स्कंदयामलंचैवषष्ठंकूर्मस्ययामलं ॥

ज्ञसिद्धंच वसतिहिसदासमग्राकरकमलेतस्यविज
यश्रीः जित्वारिपुंनृपलक्ष्मींददातिनिजभूपतेर्नसंदेहः
पतच्छास्त्रज्ञबुधश्चतुर्विधेचैवसंग्रामे श्रीमत्पासौवल्लि
नगरेख्यातोश्रीअजयपालनृपराज्ये श्रीपतिनरपति
कविनारचितमिदंतत्रसंस्थेन गौरांगीनवयौवनाशशि
मुखीतांबूलगर्भाननास्वक्कामंडनशुभ्रमाल्यवसनांश्री
खंडचर्चांकितां दृष्टाकामपिकामिनींस्वयमिमांव्यालीपु
रोभावयेदंतश्चिंतयतोजनस्यमनसित्रैलोक्यमुन्मीलि
तो ॥

न॰प॰
टी॰
२

इतिनरपतिचर्यास्वरोदयेकविप्रशंसा अस्यार्थः सुगमएव
व्याख्यानेनकृतंप्रयोजनाभावात् अथग्रंथकृद्ग्रंथकरणस्व
सामर्थ्यप्रकटनेग्रंथाध्ययनमाह श्रुत्वादाविति ७ स्पष्टा
र्थः अथस्वरसामर्थ्यप्रधानतामाह यस्येति ८ स्वरोद
यीस्वरशास्त्रंसम्यक्जानातीतिस्वरोदयीस्वरज्ञोज्योतिषि
कस्तेनहीनोरहितःयस्यराजभूपालस्यवाहिनीदिग्वि
जयशीलोराजातथापिभंगमायाति संग्रामात्पलायते
किंपुनःस्वल्पसैनिकः ८ अथस्वरबलसहितराज्ञःसाम
र्थ्यमाह तावद्गर्जंतितेवीराइति तेवीराःभटाःस्वरज्ञयुक्ताः

सप्तमंयामलंदेव्याइतियामलसप्तकं ६
श्रुत्वादौयामलान्सप्ततथायुद्धजयार्णवं
कौमारींकौशलंचैवयोगिनीजालसंचरं ७
रत्नौघंचत्रिमुंडंचस्वरसिंहस्वरार्णवं मूब
लंभैरवंनामपटलंस्वरभैरवं ८ तंत्ररणा
कृयंथाख्यानंसिद्धांतंजयपद्धतिं ॥

स्वरबलाढ्याश्चाहवसागरंसंग्राममसमुद्रंतावदेवदोर्भ्यांतरं
ति संग्रामपारंगच्छंति यावत्कालंत्रिविक्रमजयप्रापकंस्वरव
लंतिष्ठति तावद्बाहुभ्यांब्रह्मादिविष्णु० रुद्र॰ दुर्गा॰ गणेश॰ नि
हंति॰ प्रहंति॰ शाक्तिशांतिशानृयातीतइच्छामोह॰ द्रोह॰ मद॰
मात्सर्य॰ शब्द॰ रूप॰ रसस्पर्शगंधाद्यधिष्ठितत्वादेवमेवशत्रू
न्जयति॰ किंपुनःखड्गादिशस्त्रसहितः तावदित्याकांक्षयान्य
दाह यावदिति यावत्तेभटास्वरास्तेवडवानलेचक्रेनोपतंति
स्वराणामस्तंस्वरास्तसंस्थेवडवानलवडवाग्निनीतन्मुखे

योऽनलोग्निः स वडवानलस्तस्य चक्रे समूहेन पतंति स्व
रान् स्वनाममात्रादयः मात्रा वर्णो ग्रहो जीवादयोऽष्टौ स्व
राश्च लक्षिताः स एव संग्रामसागरस्तस्मिन् संग्रामसागरे
वडवानलास्तच्चक्रे वडवानलचक्रवत् भूमौ न पतंति ता
वदेव स्वरबलसहितं संग्रामपारं गच्छंति यदा पुनः संग्रा
मे कुर्वन्नत्र स्वरसमयं प्राप्ता भटाः संग्रामसागरे विलयं
यांति यथा स्वरबलेनाढ्याः पुरुषाः बाहुभ्यामेव समुद्र
पारं गंतुकामास्तावन्मात्रे समुद्रं तरंति यावत्स्थाने समुद्रे

पुस्तके दृष्टं च यो के श्रीदर्शनं ज्योतिषं तथा ९
मंत्रयंत्राण्यनेकानि कूटयुद्धानि यानि च ते
त्र युक्तिं च विज्ञाय विज्ञानं वडवानले १० एते
षां सर्वशास्त्राणां दृष्ट्वा सारोद्धमात्मना सारोद्धा
रं भविष्यामि सर्वसत्वानुकंपया ११ यत्पूर्व
राजभूपालैः संग्रामे यदि वाहिनी तथापि भ
गमायाति नृपे हीन स्वरोदये १२

वडवानलस्य भस्मिर्क्रियते तत्र चेत्पतंति तदा च तत्रैव विलयं
यांतीति प्रसिद्धिः एतावता इदित स्वराजयकारणमेव मुख्यं
तेनावश्यमेव विजयार्थिभिः स्वरोदयज्ञा ग्राह्याः स्वरोदयशा
स्त्रं पठितव्यमिति ९ अथ स्वरज्ञं विना यथा जयो भवति तथा
.. हु कथंचिदिति स्वगमं १० अन्यत्स्वरहीनं नृपं प्रमाणयति
यस्यैको पीति यस्य नृपस्य राज्ये स्वरज्ञो नास्ति तस्य राज्यं रंभाक
दलीस्तंभाः सारोपमं भाति तद्राज्यं शत्रुभिः सर्वेनाभिभूयते
११ अथ पुनः स्वरज्ञमेव प्रशंसति स्वरशास्त्रे सदाभ्यासीति
स्वगमं १२ ॥

न॰प॰ टी॰ ३

३

अथस्वरबलप्रशंसामाह दशैकेनेति एकोपिस्वरबली
राजादशराजबलानिलीलयाअनायासेनजयति दशभी
राजभिःस्वरबलिभिःशतंशत्रूणांजयति एवंशतैःसह
स्रंजयति एतावतास्वरबलमेवजयेप्रमाणं १३ अथ
प्रागुक्तमेवस्वरबलंस्वराबलंचप्रमाणयति पृथ्वैरपी
ति पृथ्वैरपिकोर्थः पुष्पचातिभिःसदापिहीनःस्वरोद
यिनाभटेननयोद्धव्यं नयुद्धंकुर्यात् किंपुनःशस्त्रपा

तावन्नरंतितेधीरादोर्भ्यांमाहवसागरम्
यावत्पतंतिनोचक्रेस्वरास्तेवडवानले १३
हस्तस्वरेस्तनस्वरेतद्रूपेवडवानले कथं
चिद्विजयीयुद्धेस्वरज्ञेनविनान्दपः तृणव
र्णोपमंतत्रयथांयचटकग्रहः १४ यस्यै
कोपिगृहेनास्तिस्वरशास्त्रस्यपारगः रंभा
स्तंभोपमंराज्यंनिश्चितंतस्यभूपतेः १५ स्व
रशास्त्रेसदाभ्यासीसत्यवादीजितेंद्रियः
तस्यदेशस्ययःकर्ताजयश्रीस्तंन्दपंभजेत्
१६ ॥

णिनासह एतावत्तायावत्कालंहीनःस्वराणांसमयस्ति
ष्ठति स्वरोदयबलेप्राप्तेस्वनाममात्रादिस्वरबलंप्राप्य
शस्त्रकोटिभिःशस्त्रधारिणांकोटिभिःसहयोद्धव्यमिति
१४ अधुनायावत्कर्तव्योद्देकमाह राज्ञःवपुमेवैषां
संग्रहःकर्तव्यइतितदाह स्वरज्ञइति १५ स्वरचक्राणी
ति ॥ १६ ॥

यामलेखिति १७ मात्रावर्णेति १८ ह्रादशाब्दमिति १९ न
कालमिति खगर्भ २० इतिस्वरोदयेचक्रनामानि पूर्वस्तु

दशैकेनशतैश्चसहस्त्रंशतसंख्यया स्व
रोदयबलेनैवदशाब्दंहंतिलीलया १७ शुभे
ऽपिनयोद्धव्यंयावद्धीनःस्वरोदये स्वरोदय
बलेशुभेयोद्धव्यंशास्त्रकोटिभिः स्वरज्ञःश
कुनज्ञश्चदैवज्ञोमंत्रपारगः केरलीविज्ञ
याराज्ञांकीर्तितंरत्नपंचकं १९ स्वरचक्रा
णिचक्राणिभूबलानिबलानिच ज्योतिषं
शाकुनंचैवषडंगानिवदाम्यहं २० यामले
षुचसर्वेषुयान्युक्तानिस्वरोदये मधुनाता
निवक्ष्येहंस्वरचक्राणिविंशतिः २१ मात्रा
वर्णग्रहोजीवोराशिर्भंपिंडयोगकौ ह्राद
शाब्दोदयंचक्रंवर्षायनर्तुमासिकं २२ प
क्षाहर्नाडिकंचक्रंतिथिवारर्क्षयोगकं न
कालस्यफलंकाष्ठास्वरंदेहोद्भवंतथा २३
इतिस्वरचक्राणि सर्वमुक्तेषुशास्त्रेषुमया
ज्ञातानियानिच चतुराशीतिचक्राणितेषां
नामानिवच्म्यहं २४ एकाशीतिपदंचक्रंश
तपदंनवांशकं छत्रंसिंहासनंचक्रंकूर्मं
पंचविधंत्विदं २५ ॥
क्रोक्तिरिति २१ एकाशीतीति २२ भूदेशोति २३ सूर्यकालान
लमिति २४ शाणिसूर्येति २५ ॥

तिथिवारंचेति २६ प्रस्तारेति २७ कालचक्रमिति २७ खलका
न॰ प॰ खमिति २८ गजमस्वरणेति २९ समरेखोड्डवमिति ३॰ स्र
टी॰
५

भूदेशंनगरंक्षेत्रंगृहंकूर्मंचपंचमं पद्मच
क्रंफणीशखराह्वकालानलंमतं २६ सू
र्यकालानलंचक्रंचंद्रकालानलंतथा चो
रकालानलंचक्रंमृत्युकालानलंमतं २७
शशिसूर्यसमायोगेचक्रंकालानलंमतं
संचहंससप्तमंज्ञेयंसप्तकालानलानिच २८
तिथिवारंचनक्षत्रंत्रिधाचैवकुलाकुलं कू
र्मचक्रंद्विधाप्रोक्तंराशिनक्षत्रसंभवं २९ प्र
स्तारंचक्रवेधंचत्रिधातंबक्रमुत्तमं भूचरं
खेचरंपंथानाडीचक्रंत्रिधामतं कालचक्रं
फणिहंसंसूर्याख्यंचंद्रजंतथा कविचक्रं
द्विधाप्रोक्तंस्थानस्वाम्यहतपूर्वकं खलका
ख्यंद्विधाचैवकृत्तिकास्थानभादिकं ३॰ को
टचक्राष्टकंप्रोक्तंचतुरस्रादिभेदतः ३१ ग
जमस्वरणंस्वहंकुंतंखड्गंछुरिंयतुं सौरिंसे
वानरंडिंभंपद्मिवर्गापवर्गाणं वीरचक्रंच
हृष्टिकंइत्यपिपाठः ३२ समरेखोड्डवंचक्रं
पंचरेखंडभास्करं त्रिविधंमातृकाचक्रंविज्ञे
यंपेपनतोरणे ३३ ॥

द्विलांगलेति ३१ पद्मानीति ३२ इतिचक्रनामानि स्वयोति
स्पष्टं ३३ ॥

अथभूबलानांप्रयोगमाह स्वरोदयेश्चेति नामजन्ममात्राद्यष्ट
भिःस्वरैर्वादशाब्दादिकालजैःस्वस्वैःशत्रुर्यदिसमस्तल्पोधि
कोवाभवतितत्रजयार्थिनांराज्ञांभूबलैर्बलंदेयं स्वरबलतु
ल्पेनशत्रुणासहजयपराजयौतुल्यमेव स्वतःआत्मनःस्वर
बलैरधिकोयदिशत्रुस्तदाशत्रोरेवजयः अत्रयुद्धेयस्यराज्ञो

अहिलांगलवीजोमिहषाख्यंसमनाडिकं
चक्रंसंवत्सरंस्थानचक्रंश्टंगोन्नतिस्तथा ३४
एतानिसर्वचक्राणिज्ञात्वायुद्धंसमाचरेत्
जयेदिहनसंदेहःशाकतुल्पोपिवैरिणं ३५
इतिचक्रनामानि अथातःसंप्रवक्ष्यामिभू
बलान्यभिधानतः कविहंहेतथाडर्गेवात
रंगेमहाहवे स्वरोदयेश्चचक्रेश्चशत्रुर्यस्य
समोधिकः तत्रयुद्धेबलंदेयंभूबलैर्विज
याथिनां ३६ तेषांनामान्यहंवक्ष्येख्यातानां
ब्रह्मयामले चतुराशीतिसंख्यानांयद्बले
नजयीरणे ३७ ऊड्डीजालंधरीपूर्णीकामा
कोल्लैकवीरिका श्रीलीक्रीचमहामारीत्वे
त्रपालीचवंशजा ३८ ॥

पूरस्यजयार्थिनाभवति कथमसौमयाजेतव्यइतिस्वरंतत्त्व
ति तत्रस्वरतोभूबलानितस्मैदत्वायुद्धायतंसज्जीकुर्यात् ज
यंजयेति तेषांभूबलानांनामान्याह स्वरोदयेचेति ३६ तेषामि
ति ३४ उड्डीति ३५ भद्रकालीति ३६ वालायोगेश्वरीति ३७ दे
वकोटिरिति ३८ ॥

दुर्मतीति ३५ त्रैलोक्येति ४० बडलेति ४१ राद्रकालीति ४२ चं
द्रःसप्तविधेति ४३ अमूनिभूबलानीति ४४ स्पष्टार्थाः इतिभूव

भद्रकालीनलीकालीकालरेखानिरामया ज
यलक्ष्मीर्महालक्ष्मीर्जयाविजयभैरवी ३९
बालायोगेश्वरीचंडीमायाभुवनकर्त्तरी श्रा
ह्लीलीसिंह्लीलीतन्वीमहामायामहेश्वरी ४०
देवकोटिःशिवाशक्तिर्धूम्रामालावराटिका
त्रिमुंडावत्सरीथर्मीमत्ताहृष्टात्वयात्वया उ
र्मनीश्ववरागौरीकालीनारहरीबला खेच
रीभूचरीशस्याहादशीहाष्टकेवला ४१ त्रै
लोक्याविजयासौरीकरालीवडवापरा रौ
द्रीचाश्विश्रमातंगीचाभिचारहनीजिता ४२
बहुकालानली भूमिः स्वरभूमिर्द्विधामता
रुद्रस्त्रिमासिकश्चैवराद्रश्चाष्टविधस्तथा
४३ चंद्रःसप्तविधः सूर्यस्तथैवयोगिनीत्रि
धा कालंवलंत्रिभेदंचतिथिनक्षत्रवारज
४४ अमूनिभूबलान्यत्रज्ञात्वायःप्रविशेद्र
णे अरयस्तस्यनश्यंतिमेघावातहतायथा ४७ ॥

लावर्गीमूर्मीचकपालीवाविलाननला वंश्रर्कांबिंबमूर्मीवप्रहराश्चिविलनगा ४४ द्रुं

लानि श्रारोःसमाधिकेति ४५ अभंगेति यथाशत्रुःस्व
जयोभवति तथामंत्रयंत्रादिकैर्बलैर्जयोपायंवक्ष्ये ४६ ता
न्याह मंत्रयंत्रादीनांनामानि रणाभिषेचनमिति ४७ ॥

यमचंटमिति ६६ वारमूलमिति ६७ फलंग्रहस्येति ६८
पीडास्थानेति ६९ शीघ्रवक्रमिति ७० वास्तदीपेति ७१ ति

तिथेः प्रकरणं वक्ष्ये वारनक्षत्रयोस्तथा यो
गाख्यकरणाख्यं च मुहूर्तं संक्रमोद्भवं ६६
चंद्रताराबलं चैव पक्षभेदेन संयुतं शुभा
शुभांश्च योगांश्च तिथिवारर्क्षयोगजान् ६७
सिद्धं संवर्तकं चैव तथा वारशुभाशुभं श्रव
मंत्रिदिनं वक्ष्ये ततो योगं त्रिपुष्करं ६८ यम
चंटं यमदंष्ट्रां क्रकचार्गलपातकान् क्रमा
रंतरूणं हत्य मूलानि शूलयोगिनी ६९ वा
रशूलं तथा कालं कालवेलां परिस्फुटां का
लहोरार्धयामं च कुलिकं कंटकद्वयं ७० फ
लं ग्रहणयोस्तस्य वत्सभार्गवयोः फलं द
र्शांचांतर्दर्शांस्तु लां वक्रातिचारयोः फलं ७१
पीडास्थानानि खेटानां ग्रहावस्थास्तथैव च
भावफलं संधिफलं लत्तावेधमुपग्रहान् ७२
शीघ्रवक्रग्रहोद्देशं गोचरं गोचरव्ययं विवा
हं च प्रतिष्ठां च दीक्षायात्राप्रवेशनं वास्तु
दीपोद्भवविन्यासं कालविशेषकास्तथा
जलयोगार्घकांडं च वर्षमासदिनार्घकृत्
७४ ॥

एवादिपंचकेति ७२ शृंगारस्पंदमिति ७३ ज्योतिषांगमिति ७४

न·प·
टी·
७

पोतकीति १५ स्पष्टार्थाः १६।१७।१८ इति जयलक्ष्म्यां शास्त्र
संग्रहाध्यायः प्रथमः १ अथात इति अथानंतरं शास्त्रसंग्रहाध्या
यानंतरं मात्रादिभेदभिन्नानां स्वराणामुदयान् ब्रह्मयामले
यान् प्रोक्तान् तान् प्रवक्ष्यामि प्रकर्षेण कथयामीति संबंधः
१ अथ स्वराणां षोडशोदयान्वक्तुं स्वरानादावाह मातृकायामि
ति पुरा सृष्ट्यादौ मातृकायां मात्राचक्रे ब्रह्मणा षोडश संख्य

तिथ्यादिपंचकं ग्राह्यं चंद्रं तात्कालसंभवं अ
वस्थानष्टमुष्टिं च लूकां चैवाहदाम्यहं १५
अंगस्पंदानि सर्वाणि कालचिन्हानि यानि च
दुष्टरिष्टान्यहं वक्ष्ये तथा षोषांच षांतिकं १६
ज्योतिषांगमिदं सर्वं ये जानंति मनीषिणः
दीपवत्तान्विजानीयान्मोहांधकारनाशने १७
इति ज्योतिषे पोतकी पिंगला काको यत्नः शि
वाक्रमेण च पंचरत्नमिदं वक्ष्ये षडंगे शाकु
नेमते १८ इति शाकुनं इति श्रीनरपतिजय
चर्यायां स्वरोदये षडंगे समाध्याये शास्त्रसंग्र
हाध्यायः प्रथमः १ अथातः संप्रवक्ष्यामि प्रो
क्तायेब्रह्मयामले मात्रादिभेदभिन्नानां स्व
राणां षोडशोदयान् १ मातृकायां पुरा प्रोक्ताः
स्वराः षोडशसंख्यया ॥

या स्वराः प्रोक्ताः ते स्वराः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ
अं अः एतेषां मध्ये ह्रस्वांतिमौ अं अः इति त्याज्यौ पुनश्चत्वारो नपुंस
काख्याः ते च ऋ ॠ ऌ ॡ इति षोडशाद्दश स्वराः स्थिताः ते च अ आ इ ई
उ ऊ ए ऐ ओ औ एते ये षोडशाद्दश स्वरा लोकेषु द्दिष्टिकेषु एकैकमेव गर

ह्वीयात् तेच अइउएओइतियास्तत्फलेनैवतल्याः अथते
षांदशानांद्विद्विस्थितानांद्वयोर्द्वयोःपूर्वएवगृहीतास्तत्कि
मिति अत्रोच्यते अकारस्त्वाद्योवासुदेवःप्रधानत्वात् अकार
एवगृहीतः इकारस्तुश्रीः सावासुदेवस्यप्रियाअतइका
रोगृहीतः उकारोरुद्रः एकारःसूर्यः ओकारस्स्कंदः अतोअ
कारादुरोधात् पंचह्रस्वाएवगृहीताः यतस्तएवशुभाशुभं
प्रकटीकुर्वंति अकारेणयत्फलंआकारेणापितदेवफलं
अस्तदोषादकारस्येत्पीडितः आकारस्यापिसएवदोषः एवमि

तेषांद्वावंतिमौत्याज्यौचत्वारश्चनपुंसकाः २
शेषादशस्वरास्तेषुस्यादेकैकोद्विकेद्विके ज्ञेया
अतःस्वराद्यास्तेस्वराःपंचस्वरोदये ३ लाभाला
भेसुखेदुःखेजीवितंमरणंतथा जयःपराज
यश्चेतिसर्वंज्ञेयंस्वरोदये ४ स्वरादिमातृको
च्चारोमातृव्याप्तंजगत्त्रयं तस्मात्स्वरोद्भवंस
र्वंत्रैलोक्यंसचराचरं ५ ॥

कारादावपिबोद्धव्यं २ ज्ञेयाअतःस्वराइति ३ अथैषांग्रहण
सिद्धिंप्रकटयति लाभालाभेसुखेदुःखमिति एषांस्वराणामु
दयेलाभप्रश्नेलाभंविजानीयात् तथाअलाभमपि सुखप्रश्ने
सुखंदुःखमपि रोगियात्रादीनांजीवितमरणप्रश्नेजीवितंम
रणंचविंद्यात् एवंसर्वप्रश्नेस्वराएवफलप्रकाशकाः ४ स्व
राणांसर्वत्रप्रधानतामाह स्वरादिमातृकाइति सर्वेषांचराच
राणांउच्चारोनामग्रहणंअकारादिमातृकाभिरेवेति नत्वका
रादिमातृकांविनावर्णाउच्चारयितुंशक्याः अतोमातृकाभि
र्जगत्त्रयंव्याप्तंअतएवप्रश्नेस्वराएवफलप्रकाशकाः ५

न॰ प॰ टी॰ ५

अथपुनःस्वराणामेवप्रधानतांप्रकटयति अकाराद्याइति अइउ
ए ओंएतेपंचस्वराःब्रह्मादयोदेवाः तत्रअकारोब्रह्मा इकारोवि
ष्णुःउकारोरुद्रःएकारःसूर्यः। ओंकारश्चंद्रमाभूमिः अन्योर्थः।
प्रयोजनकर्तृः। अकारस्वरोदयेब्रह्माणंध्यात्वाकर्मकार्यं इका
रोदयेविष्णुंध्यायेत् उकारोदयेरुद्रं एकारेसूर्यं। ओकारोदये
चंद्रं एवंतत्तदुदये॰ निवृत्त्याद्याःपंचकलाः अकारोदयेनिवृत्ति
नामकला इकारेप्रतिष्ठानामकला उकारेविद्याप्रतिष्ठिता शां
तिरेकारेस्थिता ओंकारेअतिशांतिः निवृत्तिशब्देनयात्रानिवृत्तिः

अकाराद्याःस्वराःपंचब्रह्माद्याःपंचदेवताः
निवृत्त्याद्याःकलाःपंचइच्छाद्यंशक्तिपंचकं ८
मायाद्यास्त्वक्रमेदाश्चथराद्यंभूतपंचकं शब्दा
दिविषयास्तेचकामबाणाइतीरिताः ७ ॥

अकारोदयेयदिप्रश्नःअकारश्चेदनस्तमितस्तदानिवर्तनंव
देत् इकारोदयेउदितेप्रतिष्ठाभवति उकारोदयेप्रश्नेउदिते
रुद्रंध्यात्वाविद्यावाच्या एकारोदयेसूर्यंध्यात्वाशांतिप्रश्नेशुभं
वदेत्। ओंकारेचंद्रंध्यात्वाअतिशांतिर्वाच्या अतिशांतिर्मुक्तिः
मुक्तिप्रश्नेमुक्तिर्वाच्या इच्छाद्यंशक्तिपंचकं अकारादिपंच
स्वक्रमेण॰ इच्छा॰ ज्ञान॰ प्रभा॰ श्रद्धा॰ मेधाइदंशक्तिपंचकं
स्थितं ॥ तत्रउदयेतदाश्रितस्योदयोज्ञातव्यः ८ ॥ ७ ॥

अथोत्पत् मायाद्याश्चक्रभेदाश्चपराद्यंभूतपंचकं गंधादिविषया
स्तेचकामबाणाइतीरिताः अकाराद्याः पंचस्वरामायाद्याश्चक्रभेदाः
चतुरस्रंयच्चक्रंतन्मायाख्यभेदं तत्राकारोदयेयस्यचतुरस्रंचक्रंया
स्यंपूजनीयंवातदाकारोदयेचक्रंतत्रपूजयेत् इकारेर्द्धचक्रं उका
रेत्रिकोणंचक्रंएकारेषट्त्रिकोणं ओंकारेवर्तुलंचक्रं अकारादि
ष्वपरादिभूतपंचकं पृथिव्यादिपंचकं अकारोदयेपृथ्वीगतप्र
श्नः इकारोदयेजलगतप्रश्नः उकारोदयेऽनलगतप्रश्नः एकारो
दयेवायुगतप्रश्नः ओंकारोदयेआकाशविषयप्रश्नः ऊर्ध्वगतंप्रश्न
वदेत् तेपिस्वरागंधादिविषयाः तत्राकारगंधविषयः इकार
रसविषयः उकारोरूपविषयः एकारःस्पर्शविषयः ओंकारःश

पिंडंपदंतथारूपंरूपातीतंनिरंजनं स्वरभे
दास्थितंज्ञानंज्ञायतेगुरुतःसदा ५ अकारा
द्याःस्वराःपंचतेषामष्टौभिदस्त्वमी मात्राव
र्णाग्रहोजीवोराशिर्भंपिंडयोगको ६ ॥

ब्दविषयः एतावताअकारादिस्वरोदयेतत्तद्भूतप्रश्नविषयेत
च्छुभाशुभंवदेत् अयमर्थःगुरूपदेशादेवज्ञायते अस्यार्थस्य
प्रयोजनंकिमपिनव्याख्यातं अस्मादधिकतरोर्थः सद्गुरूपा
सनयाबुध्यते इष्टदेवताप्रसादाद्वा तथाचवक्ष्यति पिंडंपदं
तथारूपंरूपातीतंनिरंजनं स्वरभेदास्थितंज्ञानंज्ञायतेगुरुतः
सदा अत्रवाख्यातंप्रकटं नतुपरमार्थतस्तेगुरवःयेपिंडंपदंत
थारूपमित्यादिप्रत्यक्षीकृत्यदर्शयंति यथायंगोः अयमस्य
इति एतेनकिमुक्तंभवति स्वराभ्यासीसदाभूयात् ५ अथाका
रादिस्वराणांमुख्यप्रयोजनमुपदिशति अकाराद्याइति अकारा
दिपंचस्वराणांमात्रादयोष्टौभेदाः पृथक्पृथक्पंचसुभवंति ६

न॰ प॰
टी॰
९

9

तत्राष्टौभेदान्वक्तुंमूलमुपदिशति प्रसमोभावत्तेति येननाम्ना
मर्त्यःप्रसमोभावत्तेनेनवाशाश्वितआगच्छति तत्रनाम्निआद्यवर्णे
यामात्रासमात्रास्वरः यथादेवदत्तनाम्निआद्यवर्णेदकारस्त
त्रएकारमात्राविद्यतेअतोदेवदत्तस्यमात्रास्वरोएकारएव पुन
र्यथायज्ञदत्तस्यनाम्नियकारआद्यवर्णस्तत्रांतर्भूतोअकारोवि
द्यतेततोयज्ञदत्तस्यमात्रास्वरोऽकारः एवंसर्वेषांनाम्नि एवं
कृष्णादिनाम्नांमनुजानांमात्रास्वरग्रहणेषांचशिष्टानांभाव
याइस्वरोग्राह्यइत्यर्थः एवंहृषीकेशादिनाम्नि अथचमहाभा
ष्ये ऋकारेइकारभागःप्रदर्शितः अतोऋकारस्यमात्रास्वरोइकारो

प्रसमोभावत्तेयेनयेनागच्छतिशाश्वितः तस्य
नामाद्यवर्णेयामात्रामात्रास्वरःसहि १॰ इति
मात्रास्वरचक्रं कादिकांतान्लिखेद्वर्णान्स्व
राथोङञणोज्झितान् तिर्यक्पंक्तिक्रमेणैव
पंचत्रिंशत्प्रकोष्ठके ॥ नरनामादिमोवर्णो
यस्मात्स्वरादधःस्थितः सस्वरस्तस्यवर्णस्यवर्णा
स्वरउदाहृते १२ ॥

पि १॰ इदंमात्रास्वरचक्रं अथवर्णस्वरमाह कादिक्षांताइति स्वरा
दयःअइउएओस्वराणामधःक्षकारांतानककारआरभ्यक्षकारप
र्यंतान्वर्णान्विलिखेत् किंविशिष्टान्कादिवर्णान्ङञणवर्ज
परित्यक्तान्कवर्गटवर्गाणांपंचमवर्णाङञणास्तान्परित्यज्यलि
खेत्तिर्यक्पंक्तिक्रमेणलिखेत् पंचत्रिंशत्प्रकोष्ठके पंचाधिकत्रिंश
त्प्रकोष्ठंकृत्वा ३५ यथाचक्रेनरनामादिमोवर्णइति अत्रोदाहरणं
देवदत्तस्यनाम्निआद्यवर्णोदकारःसदकारओकारस्वराधोलिखितोस्ति अतो
देवदत्तस्यवर्णस्वरओकारः यज्ञदत्तस्यनाम्नियवर्गीयोयकारःसतु
उकारस्वराधोलिखितस्तिष्ठति एवंयज्ञदत्तस्यवर्णस्वरउकारः १२ ॥

र्णस्वरः

इतिवर्णस्वरचक्रं १३ नष्टोक्ताइति चेद्भवंतीति यत्रक्वत्रचिद्देशेविष
येङ्जणावर्णाभवंति तदातत्फरिपाकःगजडानांफलेनसमः १४
अथान्यविधिमाह यदिनाम्नीति यदियस्यकस्यचिन्नाम्निआदिमो
वर्णःसंयुक्तोभवति तदातयोर्व
र्णस्वरःकोग्राह्यइत्याकांक्षयाह
ग्राह्यस्तस्यादिमोवर्णःतद्दृष्टान्त
र्णस्वरः यथाश्रीपतिरितिकस्य
चिन्नाम तत्रशकारउपरियो
वर्णःशकारइकारादयास्तिइति

नष्टोक्ताङञणावर्णाना
मादौसंतितेनहि चे
द्भवंतितदाज्ञेयागजडास्तेयथाक्रमं १३ य
दिनाम्निभवेद्वर्णःसंयुक्तोक्षरलक्षणः आ
द्यस्तदादिमोवर्णइत्युक्तंब्रह्मयामले १४
इतिवर्णस्वरचक्रं अतस्वराद्बलीबालोबाला
द्धस्वरोबली वृद्धात्कुमारोबलवान्कुमा
रात्तरुणोबली १५॥
र्णस्वरइकारःएवं
यद्दृष्टान्तश्रीपतेर्व
सर्वत्रविचारः अथयस्यकस्यचिन्नामानिबहूनिभवंतितत्रमात्रा
स्वरःकस्यनाम्नःप्रमाणेनग्राह्यइत्याकांक्षयास्वरज्ञाएवंवदंति ल
पटाचार्यभाषिते बहूनियस्यनामानितस्यस्युःकथंचन ततःप्रश्ना
द्भवंनामग्राह्यंस्वरविशारदैः आगममन्यस्य अथान्यवर्णस्वरंप्रति
ऊचुः बवौ शसौ षखौ ङञौ ज्ञेयावितिपरस्परं उभौतुल्यफलौ
भिन्नस्वरस्थायस्थितावपि तेनकिं जयपराजयादिविषये जयपरा
जयौतुल्यौभवतः अथयद्दवर्णस्वरनिर्णयेलपटाचार्यः यदास्वरा
दिकंनामतदाग्राह्यंपुरोऽक्षरं देशेग्रामेपुरेहर्म्येनरेनामादिवर्णतः

न॰प॰
टी॰
१०

10

वर्णस्वरोद्भवं नेषां फलं सम्यक् प्रतिष्ठितं स्वरसमात्रासंज्ञोक्तान
वर्णत्वं तद्यामले स्मृतस्वराहलीवर्णेऽइति १५ द्वादशवार्षिकादि
मात्रांतानामंतरभोगपलान्याह शाकप्रश्नेति १६ सार्पर्क्षेणेति १७
गजभूनागेति १८ ऋतुवन्हीति ॥ द्वादशवार्षिकांतरोदयप्रमा
णपलानि १४ १३ ८ १८ वार्षिकांतरोदयप्रमाणपलानि ११ । ७ । ८
। १८ अयनांतरोदयप्रमाणपलानि ५ ८९०९ ऋत्वंतरोदयप्र

शाकप्रश्नो तथा हस्तश्चित्रायां द्वादशाह्निकः
इंद्रभं च गजाः सप्त रुद्रा वर्षे च मानकं १६ सा
र्पर्क्षेण तथाश्लेषा गजबाणायने पलाः व
न्हिषड्वाणवन्हिस्वनेत्रे ऋतुपलानि च ७
गजारूपं गजाथ मीमासे मानं प्रकीर्तितं न
वर्क्षेण नववेदाः पलभागप्रमाणकं १८ ऋ
तुवन्हिभवेन्मानं दिनमानक्रमेण च षड्वन्ही
घटिकामाने त्वंतरोदयगे स्वरे १९ अस्वरो मे
षसिंहालीऽः कन्याप्रगमकर्कटः उस्वरे तु य
नुर्मीनएस्वरे तु तुलाहषौ २० ओस्वरे मृगाकुं
भौ च राशी शास्त्रगर्हस्वराः स्वराधःस्थापये
त्वेदान् राशौ यो यस्य नायकः २१ ॥

माणपलानि २३ ५८ ऋमासांतरोदयप्रमाणपलानि १८ १८ प
क्षांतरोदयप्रमाणपलानि ४९०९ दिनांतरोदयप्रमाणपला
नि ३२७ घट्यंतरोदयप्रमाणपलानि ३॰ इति १९ अथांतोदयस्वरमा
चष्टे अस्वरो मेषेति २० ओस्वरेति स्वराधस्थापयेदिति २१ ॥

अस्वरोमेषसिंहाली कोर्थः मेषसिंहालिरूपएव मेषसिंहवृश्चि
कराशीनांरूपपरः एवमिकारादयोपिस्वराशिरूपपरः तत्रयो
स्वरोयद्राशिरूपस्तस्यतस्यराशेर्योअधिपतिः सस्वराधिपाधिप
तिः यथाअःस्वरोमेषसिंहालिरूपः तत्रमेषवृश्चिकयोर्भौमः
स्वामी सिंहस्यसूर्यः भौमसूर्यौअस्वरस्वामिनौ एवंकन्यामिथु
नयोःस्वामीबुधः कर्कस्यचंद्रः तेनबुधचंद्रौइकारस्वामिनौ धनु
मीनस्वामीगुरुः तेनगुरुरुकाराधिपतिः वृषतुलाधिपतिःशुक्रः
सएवेकारःस्वामी मकरकुंभयोरधिपः शनिःशनिरोकारस्वरस्वा

भौमशुक्रजचंद्रार्कबुधशु
क्रारमंत्रिणः सौरिसौरीत
थाजीवोमेषादीनामधी
श्वराः २२ इतिग्रहस्वरच
क्रम् षोडशाक्षरवर्गः
साक्कादिवर्णास्तुपंचकाः
चत्वर्वर्णोयशो वर्गो संख्यावर्गेषुकीर्तिताः अव
र्गाद्यष्टवर्गाणांवर्णसंख्यास्तुनामतः १॥

मी अथोदाहरणं देदोचाचीचतुष्टयंरेवतीनक्षत्रस्यचरणाः
देकारवर्णेचरेवतीनक्षत्रंरेवतीनक्षत्रेणमीनराशिः उकारःमी
नराशिपतिमः मीनस्वामीगुरुःगुरुरुकारस्वामी अतोदेवदत्त
स्यग्रहस्वरउकारः तथायज्ञदत्तस्यनोयायिचुवर्णेचतुष्टयंज्ये
ष्ठाचतुश्चरणाःतत्रयकारेणयज्ञदत्तस्यज्येष्ठानक्षत्रं ज्येष्ठानक्ष
त्रेणवृश्चिकराशिःअस्वरोवृश्चिकरूपःवृश्चिक स्वामीभौमःतेन
यज्ञदत्तस्यग्रहस्वरोअकारः २२ इतिग्रहस्वरचक्रं षोडशाक्षरइति
॥१॥

न॰प॰
टी॰
११

अवर्गाच्चष्टवर्गाणांइति देवदत्तनामतः उदाहरणं दकारस्यत्रिसं
ख्यादकारोपरिएकारस्यैकादशावकारांतर्भूतोऽकारस्यैकासंख्या १
वकारस्यचतुष्टयसंख्या ४ दकारांतर्भूताकारस्यैकसंख्या १ द
कारस्यात्रिसंख्या ३ संयोगीतकारद्वयस्यद्विसंख्या २ अकारस्यापि
एकसंख्या १ एवंपिंडिताः २६ पंचभक्तेशेषमेकं १ तेनदेवद
त्तस्यजीव स्वरोअकारः १ इतिजीवस्वरचक्रं अथराशिचक्रं मेष
वृषौइति मेषनवांशाः ९ वृषनवांशाः ९ मि॰ ६ एवं २४ मिथुनां

नाम्निवर्णस्वराग्राह्याव
र्णानांवर्णसंख्यया पिंडि
ताःपंचभिर्भक्ताःशेषंजी
वस्वरंविदुः २ इतिजीवस्व
रचक्रं मेषवृषावकारेच
मिथुनाद्याःषडंशकाः ॥
मिथुनांशत्रयंचैवमिकारेसिंहकर्कटौ १ कन्या
तुलाउकारेचवृश्चिकाद्यास्त्रयोंशकाः एकारेवृ
श्चिकांत्यांशाश्चापःषट्चमृगादिमाः २ अंशास्त्रयो
मृगस्यांत्याःकुंभमीनौतथोस्वरे ॥

पात्रयमिति मिथुनांशत्रयं ३ कर्क ९ सिंह ९ एवं २१ कन्यातुलेति
कन्यायाः ९ तुलायाः ९ वृश्चिकस्यअंशाः ३ एवं २१ एकारेइतिएका
रेवृश्चिकस्यांशाःषट् ६ धनस्यनव ९ मकरादिमाषट् ६ एवं २१ अं
शास्त्रयइति मृगस्यत्रयोंशाः ३ कुंभमीनयोरष्टादश १८ एवं २१ अ
थनक्षत्रचरणेनोदाहरणं अश्विन्यादीनक्षत्रपादानामस्वरः
स्वामी पुनर्वस्वादिपंचनक्षत्रोत्तरफाल्गुन्येकचरणसहितचरणाना
मिस्वरःस्वामी उत्तराफाल्गुनीचरणत्रयसहितहस्तादिनक्षत्रचतु

ष्टयअनुराधाचरणद्वयसहितपादानामुस्वरः स्वामी अनुराधा
चरणद्वयज्येष्ठादिनक्षत्रचतुष्टयश्रवणत्रयसहितैकविंशति
चरणानाएकारस्वरः स्वामी श्रवणचरणैकयुतनिष्ठादिरेवत्यन्तच
रणैकविंशतिचरणानामोस्वरः स्वामी अथोदाहरणं देवदत्तस्य
रेवतीचरणेनओकारोराशिस्वरः ३ इतिराशिस्वरचक्रं अकारे
सप्तऋक्षाणीति रेवतीअश्विनी· भर
णी· कृत्तिका· रोहिणी· मृग· आर्द्रान्ता
नांसप्तानामकारः स्वामी पुनर्वस्वा

एवंराशिस्वरः प्रोक्तोन
वांशकक्रमोदयः ३
इतिराशिस्वरचक्रम्
अकारेसप्तऋक्षाणि

रेवत्यादिक्रमेणच पंचपंचहकारादावेवम्
क्षस्वरोदयः १ इतिनक्षत्रस्वरचक्रम् ॥ ना
म्निवर्णस्वरान्संख्यासंख्यामात्रास्वरानथा ॥

दि· पुष्य· आश्लेषा· मघा· पूर्वाफाल्गुनीपंचनक्षत्राणामिकारः स्वा
मी उत्तराफाल्गुनीहस्तचित्राः स्वातिविशाखापंचनक्षत्राणामेषा
मुकारः स्वामी अनुराधादि· ज्येष्ठामूल· पूर्वाषाढा· उत्तराषाढापंच
नक्षत्राणामेकार स्वरः स्वामी श्रवणादिउत्तराभाद्रपदांतानांपंचा
नामोकारः स्वामी अत्रोदाहरणं देवदत्तस्यरेवतीनक्षत्रेणनक्षत्र
स्वरोअकार स्वरः १ इतिनक्षत्रस्वरचक्रं नाम्निवर्णइति अत्रोदाह
रणं देवदत्तस्यनाम्निदकारस्यवर्णस्वरः ओकारस्तस्यसंख्या ५ व
र्णस्वरोऽकारस्तस्यसंख्या १ दसेवपुनः पंचसं ५ तकारस्यवर्ण
^ख्या

न॰प॰
टी॰
१२

12

स्वरउकारस्तस्यसंख्यात्रीणि ३ द्वितीयतकारस्यत्रीणि ३ मात्रास्वर
एकारस्य ४ देवदत्तस्यकारस्त्रयः ३ त्रिसंख्याएवमेकत्रसंख्या
पिंडितांचत्रविंशतिः अस्मात् ५ शेषेसतिशेषंचत्वारि तेनात्रपिंड
स्वरएकारः १ इतिपिंडस्वरचक्रं मात्रादिस्वरभेदे अथोदाहरणं
देवदत्तस्यनामजामात्रादयःस्वराः मात्रास्वरःएकारस्तस्यसंख्या
४ वर्णस्वरोओकारस्तस्यसंख्या
पंच ५ ग्रहस्वरउकारस्तस्यसं
ख्यात्रय ३ जीवस्वरअकारस्त
स्यसंख्यैका १ राशिस्वर ऊंका
रस्तस्यसंख्यापंचमस्वरोअका

पिंडेशारहतेशेषेपिंड
स्वरउद्दोच्यते १ इतिपिंडस्वरचक्रम् मात्रादिस्व
रभेदेनस्वरानुत्पाद्यनामतः योगेशारहतेशेषे
योगस्वरउद्दोच्यते १ इतियोगचक्रम् ॥

रस्तस्यसंख्यैका १ पिंडस्वरएकारस्तस्यसंख्याचतुष्टयं ४ एवंदेवद
त्तस्यनामजामात्रादिपिंडांतस्वराणांसंख्यायोगेजातास्त्रयोविंशतिः
२३ अस्माद्वाणैःशरः ५ शेषेसतिशेषंत्रयं ३ अतोदेवदत्तस्ययोग
स्वरउकारोसंपन्नः इत्येवंनामतोनैसर्गिकान्यष्टौमात्रादिस्वरच
क्राणिसमाप्तानि १ इतिश्रीहरिवंशमहादेवविरचितायांनर
पतिजयचर्यास्वरोदयेजयलक्ष्मीटीकायांमात्रादिस्वरचक्रा
ध्यायोद्वितीयः ॥ अथप्रभृतिनामजस्वरैर्देवदत्तस्यद्वादशावा
र्षिकसमयादारभ्यनाड्यंतसमयावधौदिनफलचर्यामा
ह ॥ १ ॥

प्रोक्ता नैसर्गिकेति नामजाः स्वराः मात्राद्यास्त्वष्टौ नैसर्गिकाः प्रोक्ताः
अतो नामत उत्पद्यंते अतो नैसर्गिकाः १ अत एव सर्वेषां इष्टफलेष्ट
कप्रयोजनं द्वादशाब्दादिषु समयेषु द्वादशवर्ष· वर्ष· अयन· ऋ
तु· मास· पक्षदिन· नाडीनेषु अष्टधाकालेषु तत्कारणमाह प्रभ
वादिरिति प्रभवादिक्रमेण· प्रभवविभवाख्य शुक्लादि बार्हस्प
त्यानां षष्ट्यब्दानां द्वादश द्वादशाब्दकैः प्रत्येकं अकारादयः पंचस्व
रा उदयंति एतदुक्तं भवति प्रभवादि द्वादशवर्षाणाम कारः स्वा
मी असावेव उदयः ततः प्रमाथिनामा संवत्सरस्तदारभ्य द्वादश
संवत्सरैः इकार उदयति तेन किं तावदिकारस्वरोऽधिपतिः स्वर
नंदादि द्वादशसंवत्सरैरुकारस्वर उदयति तावदुकारो राजा

प्रोक्ता नैसर्गिकास्त्वष्टौ मात्राद्या नामजाः स्वराः
एतेषामुदयान्वक्ष्ये द्वादशाब्दादिकालजान् १
प्रभवादिक्रमेणैषां स्वराणाम स्वरादिकः उद
यो द्वादशाब्दानां प्रत्येकं द्वादशाब्दिकः २ ॥

ततः शोभनसंवत्सरप्रभृति द्वादशसंवत्सरैरेकारस्वर उदयति
तेन किं तावदेकार स्वरो राजा ४ अथ राक्षससंवत्सरादि द्वाद
शसंवत्सरैरोकारस्वर उदयति तेन किं तावदोकार एव राजा
अत्रोदाहरणं· संवत् १५७२ समये शाके १४३७ एतावद्ये प्रभ
वादयो गताब्दाः तेषामानयने रत्नमालासंहितायां प्रोक्तं तथा
च शाकेंद्रकालः पृथगाकृति २२ घ्नः शशांकनंदाश्वियुगैः
४२९१ समेतः शराद्रिवस्विंदु १८७५ हृतः सलब्धः षष्ट्या व
शेषे प्रभवादयोऽब्दाः अनेन गणितविधिना प्रभवादयः शाकाः
वर्ष १९ मास १ दिन २५ घटी ५ पल ३· एतावत्संवत्सराः शाके
१४३७ समये चैत्रशुक्लप्रतिपदि गताः एषां द्वादशवर्ष १८।१।

न॰प॰ टी॰ १३

13

२३।४५। पर्यंतमकारोऽधिपतिरासीत् सांप्रतं प्रमाथिनामसंवत्सर
मारभ्य द्वादशसंवत्सरावधि॰ इकारस्वर ईश्वरो वर्त्तते एतेन किं देव
दत्तनामोदाहरणे॰ नामतः पिंडस्वराख्य उकार उदितोऽस्ति तदुदयब
लात् पिंडस्वरोदयोक्तकर्मसिद्धिं यास्यति अथ वर्त्तमानप्रमाथिना
मादि द्वादशवर्षं दशास्व इकारात् प्रभृति अंतर्दशास्वराणां भुक्तभो
ग्यस्वरांतर्दशाकालप्रमाणमाह अस्यांतरोदयेति वर्ष १ मास १
दिन २ घटी ४३ प ३८ एतैर्वर्षादिभिः द्वादशस्व उदयस्वरान् अंत
र्दशास्वरा वार्षिकचक्रं अथ प्रभवादीनां संवत्सराणां प्रत्येकमंत
र्दशास्व भोगः तावदीश्वरः अंतर्दशाविभागकरणं दिनचर्यायां ले

द्वादशवार्षिकचक्रं

अस्यांतरोदयो वर्षमेको
मासो दिनद्वयं लोका
श्चिनाडिकाः प्रोक्ता अष्टत्रिं
शत्पलानि च ३ इति
द्वादशवार्षिकचक्रम्
प्रभवाद्यब्दमेकैकमु
दयस्तु स्वरादिकः ॥

ख्ं २।३ इति द्वादशवार्षिकचक्रम् अथ प्रभवादीनां संवत्सराणां
प्रत्येकमस्वराधिपतीनाह प्रभवाद्यब्दमेकैकेति अकारादिकाः
पंचस्वराः प्रभवाद्यब्दमेकैकं प्रति॰ उदयो भवति कोऽर्थः प्रभ
वादीनां प्रत्येकं अस्वरादिकः स्वामी भवति तथा उदाहरणं प्र
भवे वर्त्तमाने अकारस्य उदयः विभवे वर्त्तमाने इकारस्योदयः
शुक्लनाम्नि वर्त्तमाने उकारस्योदयः प्रमोदनाम्नि वर्त्तमाने
एकारस्योदयः प्रजापतिनाम्नि वर्त्तमाने ओकारस्वरोदयः
एवं षष्ट्यब्देषु प्रवर्त्तमानेषु अकारादयः पंचस्वरा द्वादशधा

उदयंति तत्रअकाराद्येकस्वरोदयेएकादशास्वराणामुदयःस्या
त् एतदुक्तंभवति प्रभवाद्येकैकवर्षंदशासुप्रभवादिपतिः स्वरां
तएकादशास्वराणामंतर्दशास्यात् सएवोदयः अथांतर्दशोदय
कालमाह द्वादशाब्दस्येति द्वादशाब्दंदशास्वराणांभुक्तिः वर्षमे
कं मासमेकंइत्यादि तत्रवर्षाणांभुक्तिः मासमेकंदिनद्वयं लो
काब्धिनाडिकाअष्टत्रिंशत्पलानिचेति मास १।२।४३।३८ ए
षांप्रभवाद्यंतर्दशास्वराणांभुक्तिः तत्रयदाप्रभवःप्रवर्त्तते व
र्षपर्यंतमस्वरस्यदशा तत्रांतर्दशाआदौअस्वरस्यैवांतर्दशामा
समेकादिभुक्तिःतदुपरिइकारोंऽतर्दशापतिःतस्यापीयमेवभु

वार्षिकस्वरचक्रं

अयनस्वरचक्रम्

द्वादशाब्दस्यवर्षाणांतद्भुक्तिर्वार्षिकेस्वरे १ इति
वार्षिकस्वरचक्रं अस्वरोदक्षिणेस्वामीउस्वरश्चो
त्तरायणे वर्षभुक्त्यर्धमानेनभोगःषाण्मासि
कःस्वरे १ इतिअयनस्वरचक्रं ॥

क्तिःइकारोपरिउकारस्यांतर्दशातद्भुक्तिप्रमाणेन उकारादुपरिएका
रस्योदयस्तावद्भुक्तिप्रमाणेन एकारादुपरिओकार स्वरस्योदयः मा
समेकादिभुक्तिप्रमाणेनतदुपरिपुनरकारस्यैवोदयोभवति एवमे
कादशास्वराअंतर्दशासुउदयंति एतेनकिं द्वादशाब्दादिनाऽंतर्द
शाकालंएकादशधाविभजेत् ग्रंथोक्तांतर्दशाकालोलभ्यते इदम
ग्रेवक्ष्यतिच अथायनस्वरोदयमाह अथांतर्दशाभुक्तिः दिन १९।
३१।४९।१ इत्ययनस्वरचक्रम् ॥

न· प·
टी·
२४

14

अथुनावसंतादिऋतुषु अस्वरादीनामुदयमाह अकारादीति मृगादिरा
शिद्वयभानुभोगात् षट्‌ऋतवस्तुःशिशिरोवसंतइतिसंहितोक्तत्वान्मे
षादिराशिद्वयरविभोगाद्वसंतादयःषट्‌ऋतवोभवंति मासद्वयात्मकोऋ
तुः यावन्मेषवृषस्थोरविः मिथुनराशिद्वादशांशस्थोरविः एवंद्विसप्त
त्यंशाः ७२ तान्येवद्विसप्ततिदिनानि तैर्द्विसप्ततिदिनोदयैरकारस्योद
यः एवंमिथुनांशाष्टादश १८ कर्कस्यत्रिंशदंशाःसिंहस्यचतुर्विंश
तिःएवंद्विसप्ततिदिनानि ७२ तैरिकारस्योदयः सिंहस्यषडंशाः ६ क
न्यातुलयोःषष्ट्यंशाः ६० वृश्चिकस्यचषडंशाःएवंकृत्वाद्विसप्ततिदि
नानिभवंति तैरुकारस्वरस्योदयः ७२ वृश्चिकस्यचतुर्विंशत्यंशाः २४

ऋतुस्वरचक्रम्

अकारादिस्वराःपंच
वसंतादिक्रमोदयाः
एकैकस्मिन्स्वरेप्रो
क्ताद्विसप्ततिदिनोद
याः १ षड्दिनानिर
दानांशोवह्निवेदपलानिच अंतरोदयमानेस्या
दृतुनाम्निस्वरोदये २ इतियामलेऋतुस्वरच
क्रम् ॥

धनुःसंपूर्णःमकरस्याष्टादशांशाः १८ एवंद्विसप्तत्यंशाः ७२ एभि
रेकारस्वरोदयोभवति मकरस्यशेषद्वादशांशाः १२ कुंभमीनयो
श्चांशाःएवंद्विसप्ततिदिनैरोकारस्वरस्योदयः अनेनक्रमेणअका
रादिस्वराःपंचवसंतादिऋतूदये उदयंतइत्युक्तं १ अथातऋ
तुषुप्रत्येकस्वरदशासु अंतर्दशास्वराणांभुक्तिमाह षड्दिनानी
ति सुगमं २ ॥

अथमासस्वरोदयानाह नभस्येमार्गवैशाखेति १ उकारश्चेति २ हे दिनेति सुगमं ३ इतिमासस्वरचक्रम् अथपक्षस्वरमाह अस्वरः क्र स्मपक्षेति तथाच दिन १ दंड २ पल ४५ । १ इतिपक्षस्वरचक्रम्

माससस्वरचक्रम्

पक्षस्वरचक्रम्

दिनस्वरचक्रम्

नभस्येमार्गवैशाखेअ
स्वरस्योदयोभवेत् आ
श्विनश्रावणाषाढेषि
कारोनायकःस्मृतः १
उकारश्चैत्रपौषस्यादेका
रोज्येष्ठकार्तिके ओका
रउदयंयातिमाघफा
ल्गुनमासयोः २ हेदिनेद्वयोर्योनाडयःषष्ठत्रिंश
त्पलानिच अंतरोदयसुज्ञेयमावत्तैमासिकस्व
रे ३ इतियामलेमासस्वरचक्रं अस्वरः क्रमपक्षे
शः शुक्लपक्षेशउस्वरः पक्षान्तिकांतरेभुक्तिर्मा
समुक्त्यर्थमानतः १ इतियामलेपक्षस्वरचक्रम्
अकारादिक्रमान्मस्यनंदादितिथिपंचकं ॥

अथदिनस्वरानाह अकारादावितिसार्द्धश्लोकः इतिदिनस्वरच
क्रम् ॥

अथघटीस्वरमाह तिथ्यादाविति १ इतिघटीस्वरचक्रम् अथद्वादशा
न॰ प॰ ब्दादिनाडंतेषुअंतरोदयमाह द्वादशाब्दादीति अब्दांतरोदये काल
टी॰ मानंपंचधाउक्तं वर्षमासइति यतः पंचैरेवपंचधाकालमानैःफलं
१५ परिणमति १ कुत्रोक्तमाह वर्षमेकंमासमेकामित्यादिकस्यफल
स्यपरिपाकवर्षं १।३।५३। ३५ कस्यापिमासादिभिःकस्यापिद्वेदिने
त्रयोनाड्यादिभिः तावद्वर्षादिरूपंमानं १ अथभुक्तभोग्यांतरोदय

15

घटिस्वरचक्रम्

दिनस्वरोदयोनित्यं
स्वस्वतिथ्यादिजायते
अस्यांतरोदयःपंचच
सप्ताशपलानिच १
तिथ्यादौघटिकाःपं
चपलानिसप्तविंशतिः
अंतरोदयप्रुक्तोसौदिनस्वरस्यसूरिभिः २ इ
तिदिनस्वरचक्रं घटिस्वरोघटीःपंचपलानि
सप्तविंशतिः अस्यांतरोदयःप्रोक्तोघटिकार्ध
प्रमाणतः १ इतियामलेघटिकास्वरचक्रम्
द्वादशाब्दादिनाड्यंताःस्वस्यानाद्यस्वकालतः

स्वरान्कर्तुंगणितमाह द्वादशाब्दइति अथोदाहरणं अधुनाप्रभ
वादिद्वादशसंवत्सरैरकारस्वरोभुक्तः वर्तमानकालेप्रमाथिसं
वत्सरादारभ्यद्वादशावर्षपर्यंतमिकार स्वरस्योदयोवर्तते शा
के १४३७ समयेचैत्रशुद्धप्रतिपदिनस्यभुक्तवर्षाणिचत्वारि
४।११।२५। पंचपंचाशद्दिनानिवर्षाणिषष्ट्यधिकशतत्रय ३६०
गुणितानिदिनसहितानि १४९५ शारगोब्धिसंख्यांशावःषष्ट्यागु
णितेजातं ८९७०० पलानिभुक्तदंडानि षष्ट्यागुणितेपलानि

५३८२००० अथ द्वादशाब्दांतरोदयपलानि १४१३७८० व्योमकुंजर
शैलाग्निसुधाकरयुगेंदवः द्वादशाब्दांतरोदये हारः अनेन हारेण
इकारस्वरभुक्ताब्दपलेभ्यो लब्धा भुक्तस्वरास्त्रयः इकारादारभ्य इउ
एस्वरा भुक्ता ओकारोंतर्दशाधिपत्वेन वर्त्तते तस्यापि भुक्तभोग्यदि
नानि ३१८।५१। भोग्यदिनानि ७५।५२ एतावता ओंकारस्य उदयः
चैत्रशुक्लप्रतिपदारभ्य आषाढकृष्णप्रतिपत्पर्यंतं विद्यते तदुप
रि अकारस्यांतरोदयो भविष्यति अथ वार्षिकस्वरोदयांतरोदयां
तरोदयोदाहरणं अधुना षोडशः संवत्सरश्चित्रभानुः शाकाब्दोग
तः शाकाब्दास्तु भुक्ताश्च भवंति भोग्यवर्षस्य परिचायकाः यथा
आदौ कल्पारंभे चैत्रप्रतिपदि भुक्ताब्द एव न· ततो वर्षप्रमाणदिने
ष्वतीतेषु पुनश्चैत्रशुक्लप्रतिपद्येकं वर्षं गतं लिख्यते तद्वर्ष
भोग्यस्य द्वितीयस्य परिचायकं तथा शाकाब्दा एकैकेषु व्यतीतेषु
वर्षेषु शाकाब्दसमूहा जाताः तत्र बार्हस्पत्यवर्षाश्च भवंति तस्या
पपत्तिः सिद्धांतादिषु वराहसंहितासु रविभगणप्रमाणं रविव
र्षाः गुरुभगणा वराहमिहिरोक्ताः जिनयमवेदभुजर्त्तुहव्यभुजः
एकैकस्मिन्वर्षे कियत्कालाधिकगुरोराशिभोगः तत्प्रमाणेन व
राहमिहिरेण जिनयमर्त्तुहव्यभुजो भगणाः कल्पिताः गुरुभग
णाद्द्वादशांशा गुरुवर्षाः स्युः ततो रविवर्षभगणेभ्यो गुरुवर्षाधि
काः द्वयोरंतरे गुरुवर्षाधिकाः ततो ३८४२२४ गुरुभगणाः भ
गणाब्दाः ४३७०८८८ सौराब्दाः ४३२०००० अंतरं ५०८८८ अपवर्त्ती
कः २३०४ शाकादौ गुरुः २।८।३९।२२ गुरुवर्षशेषं रविवर्षाणि
चक्रेणापवर्त्य गुरुभगणान्शाग्गुणकाराः २२ द्वाविंशतिः
हाराः शाश्माः शराद्रिवस्विंदवः १८७५ गुणभागहाराभ्यामेकव
र्षेण गुरोर्मध्यमगत्या रविवर्षाभ्यंतरे भोगो लभ्यते राशिः १।०
।२१।७ प्रभवादेर्भोगो रूपराशिरेव तदुपरि अग्रिमवर्षस्य प्रति
मकलारविकलाभोगः भुक्त एवागच्छति पंचकलाभोगः प्रत्यह
गुरोः अतस्तेन भोगेन कलाविकलाभ्यां शाब्ददिनानि चत्वारिदंडा
स्त्रयोदंडास्त्रयोदशाद्या अग्रिमवर्षं चैत्रशुक्लप्रतिपदः पश्चादेव
त्रयोदशदंडसहितं चतुर्भिर्दिनैः प्रवृत्ताः एवं तदग्रिमवर्षस्यप्र

न·प·
टी·
१८

16

वृत्तिरष्टभिर्दिनैः षड्विंशतिदंडैः पश्चादेव प्रवृत्तिर्भवति एवं सर्वे
षां प्रवृत्तिर्ज्ञातव्या अत एवास्माभिर्व्याख्यानेटीकायां कृते शकाब्दा
भुक्तसंवत्सरप्रवृत्त्यंते शेषादिनानि भोग्यस्य वर्षस्य गतान्येव तेना
ग्रिमवर्षेण फलप्रवृत्तिर्वक्तव्या अस्माकं मतमेतत् गणितद्वारेण
दर्शितं अन्येपि ऊहयिष्यंति ननु तानि दिनानि प्राग्वर्षस्य भुक्ता
नि भुक्तवर्षेभ्यो भुक्तफलानि न प्राप्यंते यथा गुरोरेव भगणादयः
अथोदाहरणं शाके १४३७ गतशाकाब्दात् प्राग्वर्षभुक्तवर्षाणि
षोडश सप्तदशमस्य सभानोः षट्पंचाशद्दिनानि ५८ भुक्तान्या
गतानि तेन चैत्रशुक्लप्रतिपत्पश्चाच्छाके १४३८ समये माघशुक्ल
चतुर्थी सप्तदशमः सभानुः प्रवृत्तः तस्मात्तद्भुक्तदिनानि पंचपंचा
शत् ५५। ४५ पंचचत्वारिंशद्दंडाः सभानोरधिपतिरिकार स्वरः
तस्य भुक्तपलानि सप्तशताधिकं लक्षद्वयं २००७०० अथ वार्षिक
स्वरांतर्दशाभोगपलानि ११७८११ सर्वेषां सुधरणीनागपर्वतेंदुः स
थाशावः अयं हारराशिरंतरोदयस्वरभुक्तपलेभ्यो हारशामः वा
र्षिकस्वरांतरंतर्दशास्वराः इकारस्वरात् द्वितीय उकारस्वरस्यैवां
प्रवर्त्तते तस्य भोग्यदिनानि नव ९ द्विचत्वारिंशद्दंडाः ४२ तेन किं
जातं चैत्रशुक्लदशम्यां द्विचत्वारिंशद्दंडोपरि एकारस्यांतरोदयस्य
प्रवृत्तिर्भविष्यति वैशाखशुक्लद्वादश्यां दंडे पंचविंशति २५ च
त्वारिंशत्पलपर्यंतं ४० अधुना चैत्रशुक्लप्रतिपदिकस्यायनस्वरस्य
उदयांतरोदयश्च विद्यते तदुदाहरणं अस्वरो दक्षिणे स्वामी इस्व
रश्चोत्तरायणे इति वचनात् चैत्रप्रतिपदि उत्तरायणे इकारोदयः
प्रवर्त्तते तथा चायननिर्णये वराहः दक्षिणमयनं सवितुः क
र्कटाद्यं मृगादि तच्चान्यदिति वचनात् शाके १४३८ समये पौष
शुद्ध १२ द्वादश्यां सं मकरेऽर्कः ततश्चारभ्य चैत्रशुक्लत्रयोदश्यां
संमेषेऽर्कः अर्द्धायनं तेन चैत्रशुक्लप्रतिपदि इकारस्वरस्यैव उ
दयो विद्यते अथांतरोदयानामुदाहरणं मृगादिभुक्तांशाः ७८
एषां पलानि २८०८०० अष्टशताधिका अष्टाविंशतिरयुतानि अ
यनस्वरांतरोदयपलानि ५८९०९ असावेकराशिरयनस्वरांत
रोदयभोगः अयमेव हारः अनेनायनभुक्तपलेभ्यः प्राप्तांशांतरो

दयस्वरास्त्रयः ३।४९।५। एकोनपंचाशद्दंडाः चैत्रशुक्लप्रतिप
दि एकोनपंचाशद्दंडोपरि उकारस्वरोदयः वैशाखवदितृतीयायां
दंड ३३ पर्यंतं अथऋतुस्वरोदयान्तरोदयोदाहरणं अथऋतु
नां प्रहन्ति· सूर्यसंक्रमतः तथा च संहिताकारः मृगादिराशिद्व
यभानुभोगात् षडृतवः इति वचनात् मकरसंक्रमणादारभ्य चै
त्रशुक्लप्रतिपदि अष्टादशदिनानि मीनसंक्रमणाज्जातानि मी
नादारभ्य वसन्तऋतुः एतेन अकारः स्वरोदयो विद्यते अथान्तरोद
यः अथान्तरोदृशाकालः षट्दिनानि ८।३८।४२ एषां पलानि
२३५८३ रामांगेषुगुणाश्विनः असावन्तरोदयहारः अथोदयस्वरः
अथोदयस्वरस्य भुक्तपलानि ८४८·· खखनागाब्धिरसाः असौ भा
ज्यराशिः एभ्यो हारप्राप्ता अन्तरोदयस्वरोदयः दि १ दंड ३८ प ९
तेन वर्तते असान्तरोदये अकार इकारो भुक्तस्वरौ उकारस्वरस्य अन्तरोद
यो वर्तते तस्याभोग्यं चैत्रशुक्लप्रतिपत्तद्दिनमेकं अष्टत्रिंशद्दंडाः न
वपलानि चैत्रशुक्लतृतीयायां अष्टाविंशद्दंडपर्यंतं अथमासस्वरोदया

उदयान्तेषु नस्तत्रान्तरैरेकादशोदयैः १ ॥

तरोदयोदाहरणं चैत्रकृष्णप्रतिपदारभ्य चैत्रशुक्लप्रतिपत्पर्यंतं
षोडशदिनानि तत्र मासान्तरोदयस्वरस्य विभागः द्वे दिने २ आब्धयो
नाड्यः ४२ अष्टाविंशत्पलानि च एषां पलानि भागहारः ५८ १८
नागेंदुगजखचराः उ दिनस्वरस्योकारस्य भुक्तपलानि ५०८·· ३
असौ भाज्यराशिः भाज्यभक्तः पंचमांशोनद्वाविंशतिदंडाः तदुपरि
एकारस्वरस्यान्तरोदयः चैत्रशुक्लचतुर्थ्यां दंड ५ पर्यंतं अथपद
स्वरस्योदाहरणं अस्वरः कृष्णपक्षेशः शुक्लपक्षेशः स्वरः चैत्रप्रति
पदारभ्य इस्वरस्य उदयो विद्यते चैत्रशुक्लप्रतिपदि उदयान्तरोदयोपि
इकारस्यैव अथदिनस्वरोदयोपि इकारस्यैव अथदिनस्वरोदाहर
णं चैत्रशुक्लप्रतिपदि अकारस्य उदयः आदौ पंचदंड सप्तविंशतिप
लानि पर्यंतमन्तरोदयोपि अकारस्यैव १।२ इति स्वरचक्रं इति
वटीस्वरचक्रं द्वादशाब्दानि नाड्यन्ता इति १ ॥

वर्षमासादिति २ द्वादशाब्दस्वरा इति ३ लब्धेति ४ अथानंतरं द्वादशा
ब्दादीनां उदितांतरोदयस्वराणां पंचबालादिकावस्थेति नामस्वरव
शेन मात्रादिनामस्वरवशेन द्वादशाब्दस्वरादीनां पंचबालादिकाव
स्था भवंति अवस्थाः कल्प्यंते तेषामवस्थाभेद एव नास्ति ते तु सर्वे
षां साधारणाः अतः सर्वेषां स्वनामस्वरवशेन तेषां पृथगवस्थाः प
रिकल्पनोदितस्य द्वादशाब्दादिस्वरस्य॰ कस्यचिन्नामवशेन बाल
संज्ञा भवति कस्यचिन्नामस्वरवशेन कुमारसंज्ञा भवति कस्यचि
द्युवेत्यादिसंज्ञाः परिकल्प्यंते ५ ताः पंचसंज्ञा आह आद्यो बालः कु

वर्षमासदिवानाडीपलानि चक्रमादितः कालमा
नेन मया प्रोक्तं पंचधात्र स्वरोदये २ द्वादशाब्दः स्वरा
दीनां भुक्तं पलमयं त्वतत् तदुक्तं स्वस्वमानेन ल
ब्धं शेषं द्विकं भवेत् ३ लब्धे भुक्तस्वरास्तेयाः शेषे
चैवोदिताः स्वराः अस्मिन् षष्ठ्यादिभक्ते तु भुक्ताः स्या
दुदितस्वरः ४ उदितस्य स्वरस्यास्य नामस्वरवशेन
ताः पंचबालादिकावस्थाः स्वस्वकालप्रमाणतः
५ आद्यो बालः कुमारस्तु युवा वृद्धो मृतस्तथा निजा
वस्थास्वरूपेण फलदाना त्रसंशयः ६ किंचिल्लाभ
करो बालः कुमारस्त्वर्थलाभदः सर्वसिद्धो युवा प्रो
क्तो वृद्धे हानिर्मृते क्षयः ७ ॥

मार इति अत उक्तं नामस्वरवशेन संज्ञा भवति तर्हि नामस्वरवशेनैव के
न प्रकारेण तथा व्याख्यायते य एव नामस्वरः स एव द्वादशाब्दादिस्वरांत
रोदयस्तदा स बालसंज्ञः नामस्वराद्द्वितीयः स्वरः कालजस्तदा कुमारस्वर
संज्ञो भवति नामजात्तृतीयो युवासंज्ञः चतुर्थो वृद्धसंज्ञः पंचमो मृतसं
ज्ञ इति अनेन प्रकारेण नामस्वरवशेन संज्ञाः कल्प्यंते ताः संज्ञा निजा
वस्थास्वरूपेण फलदाः यस्य यः संज्ञास्वरः स संज्ञास्वरूपफलदः ६
तासां संज्ञानां फलमाह किंचिल्लाभकरेति ७ ॥

कुत्रेदं फलं परिणमतितन्स्याकांक्षामाह यात्रायुद्धेति ८ सर्वेष्विति ९
शुभाशुभेष्विति १० दानेदेवार्चनेति ११ विवाहादीति १२ अथपंचबा
लादिकावस्थानां यथोत्तरंबलमाह मृतोबालइति सगमे १३ य
स्माद्यस्यतृतीयोयुवा सतस्मात्सजयंलभते यस्माद्यस्यचतुर्थः
नस्माद्युद्धतोरणेभंगंप्राप्नोति यस्ययस्माद्द्वितीयःसद्वितीयात्तुस
र्वतोजयंलभते योयस्येति योधयोर्द्वयोर्यस्माद्वर्णस्वराद्यःपंच

यात्रायुद्धेविवादेचनष्टेदृष्टेऽजान्विते बालस्व
रोभवेच्छुभोविवाहादिशुभेऽशुभः ८ सर्वेषुशुभ
कार्येषुयात्राकालेनथैवच कुमारःकुरुतेसि
द्धिंसंग्रामेसत्ततोजयः ९ शुभाशुभेषुसर्वेषुभ
त्रयंत्र्यादिसाधने सर्वसिद्धिंयुवादत्ते यात्रायुद्धवि
प्रोक्तः १० दानेदेवार्चनेदीक्षायांगूढमंत्रप्रकल्प
ने वृद्धस्वरोभवेच्छ्रेष्ठोरणेभंगोभयंगमे ११ वि
वाहादिशुभंसर्वंसंग्रामाद्यशुभंतथा नकर्तव्यं
शुभंकिंचिज्ज्ञातेमृत्युस्वरोदये १२ मृतोबालस्त
तृतीयेनभवेत्सिद्धिःशेषामध्यफलप्रदाः १४
वैर्ज्ञातव्याःस्वरवेदिभिः १३ योयस्यपंचमस्थाने
सस्वरोमृत्युदायकः तृतीयेनभवेत्सिद्धिःशो
षामध्यफलप्रदाः १४ ॥

मःसमृत्युदायकः यतःपंचमस्यमृत्युसंज्ञाकथितातानेभ्योसहयु
द्धंनकुर्यात् स्ववर्णस्वरात् वृद्धमृतइति मृतबालयोःस्वरयोर्बा
लस्वरोबली बालवृद्धयोर्वृद्धः वृद्धकुमारयोःकुमारोबली कु
मारयूनयोर्युवाबली अर्थान्मृतबालयोरधिकोबालोवृद्धः
बालवृद्धयोर्वृद्धोऽतिबलः एवमुत्तरोत्तराधिकेनयथाधिकबल
कल्पना १४ ॥

यावृद्धः कुमारस्तस्य स्वरः
यथोत्तर वलास १ मृ.पं४

न॰ प॰
टी॰
१५
18

अथविशेषात्वृद्धादिचातुरंगयुद्धसमबलफलमाह मृत्युर्हीनेति
उभयोर्भटयोर्युद्धे हीनःस्वरेसति मृत्युः यो हीनःस्वरःसोऽधिकस्व
रान्मृत्युमभ्येति वृद्धस्वरात्मृतिंप्राप्नोति वृद्धोकुमारतः मृत
स्वरोबालस्वरात्मृतिंप्राप्नोति बालस्वरःकुमारस्वरात्मृतिंप्रा
प्नोति कुमारोयुवस्वरात् यतउक्तंमृतोबालस्तथावृद्धइति अ
थवा अकारादाकारोऽधिकमात्रकः आकारादिकारः इकारादीका
रःउकारादेकारोऽधिकःस्वरः एकारादैकारः एवमग्राग्रयोरपि अ
न्यायमर्थःकथंव्याख्यातः कविप्रोक्तोनभवति तत्रोच्यते मृतो
बालस्तथावृद्ध इत्यत्रयथोत्तरबलाःकथिताः तेनार्थेनैवकावि
नाकथनोक्तं अत्रनाम्नीतिहीनस्वरताउक्तानतुनाम्निबालादि
कावस्थाहीनाधिकानोक्ता स्वराधिकेनाम्निजयःउभयोर्भटयोर्यस्य
नाम्निहीनःस्वरोभवति सोऽधिकःस्वरान्मृत्युमेति उभयोस्तुल्य
मेवफलं अत्रोदाहरणं एकस्यएकएवनामाद्यवर्णोऽपरस्यहि
स्वरःअधिकस्वरात्हीनस्वरोम्रियते स्वराधिकेऽयमेवजयः तथा॰

मृत्युर्हीनस्वरेनाम्निजयोनाम्निस्वराधिके स
मनाम्निभवेत्साम्यंसंधिर्जयपराजयौ १५ ए
कस्वरेभवेत्साम्यंद्वितीयोऽर्थफलप्रदः ॥

एकोहिस्वरः अन्यस्त्रिस्वरःतथापिअधिकस्यजयः तथाव्याख्यान
मस्वराआकारादयोयथोत्तराधिकाः अमुमर्थंछंदोलक्षणज्ञाजा
नंति समनाम्निभवेत्साम्यं समस्वरेनाम्निद्वयोर्भटयोस्तुल्यमेव
फलं तत्तुल्यतामाह संधिर्जयपराजयौ एकद्वित्रिचतुःपंचमा
त्रकैर्यदिनाम्नोस्तुल्यतायदितदासमंभवतिमैत्री अथवासंग्रा
मेजयः संग्रामाउभयोरपिपराभवः पलायनमेवपराभवः इ
यमेवसमता तथाचसमरसारे हानिंमृतिंविजयमाहतथापि
कामानुल्याजयंचसमरंयदिवापिसंधिं तुल्यमात्रेत्यर्थः तथा
चमात्रकायां एकमात्रोद्विमात्रस्त्रिचतुःपंचमात्रकः यथो
त्तरबलायुद्धेज्ञातव्याःस्वरपारगैः तत्रैव एकमात्रकद्विमात्र

कादिलक्षणं एकमात्राकवर्णोऽष्टकिवर्णोद्विमात्रकः कुश्चिकस्त्र-
यिकः केऽस्तकोवर्णः पंचमात्रकः अन्यच्च स्वरव्यंजनयोः संख्याना
म्नोः शार १५ ऊनाधिके जयोहीनेऽत्र लिंसाम्ये संधिर्वा समरागमः
१५ एकस्वरेति एकस्वरे द्वयोर्बालस्वरे सममेव न कस्यापि जयो न
पराजयः बालकुमारयोः संग्रामेऽर्द्धफलं कुमारस्य किंचिज्जयः
बालमृत्वोः फलं पूर्णं मृतः सर्वपदेजयः बालवृद्धयोर्बालस्यवं
यः बालेतरयोर्भयमात्रं १६ अथजयाभिलाषी प्राज्ञो यथा जय
स्तितज्जयसमयमाह प्राज्ञोऽस्तुः स्वरेति यस्मिन्काले प्राज्ञो
ऽस्तुः स्वरो भवति एवं प्राज्ञोऽस्तुस्वरे स्वस्य मृति स्वरे ग्रामे तत्का

तृतीयेतु फलं समर्णंतु र्येबंधः पराजयं १६ प्राज्ञो
ऽस्तुस्वरे ग्रामे मृति ग्रामे स्वकीयके तत्कालेप्रा
रभेद्युद्धं विजयो भवति ध्रुवं १७ तत्काले मातृको
ग्रामो लोदिने वर्णस्वरस्तथा एते ग्रहस्वरो ज्ञेयो
मासे जीवस्वरोदयः १८ अतो राश्यंश्यकोग्रा
स्यः षण्मासे पितस्य संभवः ॥

लेयुद्धं प्रारभेत् विजयो भवति नान्यथा किंतु सत्यमेव सर्व
जयहेतौ मुख्यः एषोयं १७ इदं तात्कालयुवा स्वरग्रामे पिलक्ष
णं समाचष्टे तत्काले मातृकेति १८ अतावित्ति तत्काले विद्यावा
दादिचतुर्विंशयुद्धकाले नाम जो मातृकः स्वरः स्वस्य पंचमस्वर
ग्रास्यः मात्रास्वरवशेन युद्धकाले नाडीस्वरस्योदयः स्वस्य युवा
स्वराख्यो भवति प्राज्ञोऽस्ताख्यः एवं सति युद्धं कुर्यात् जय एव
स्यात् अत्रोदाहरणं देवदत्तविराजयोर्युद्धे तत्काले नाडीस्वरे अ
कारे ग्रामे इकारो मात्रास्वरयोर्वलेन देवदत्तस्याकारो युवा विं
राजस्याकारो मेऽस्तुस्वरः एवं लक्षणे तत्काले प्रारभेद्युद्धमिति स

र्वेषादेवदत्तस्यजयः अथोनयोर्जयकालेदिनस्वरोयत्रुकारो
न॰प॰ दयःदकारवकारयोर्वर्णस्वरयोरोकारोअकारश्चद्वयोर्हद्ध
टी॰ कुमाराख्येतद्वशाज्जयोविराजोदेवदत्तंजयति अथदेवदत्तस्य
१९ ग्रहस्वरएकारः तद्वलात्कुम्भपदेअकारस्योदयःसद्वद्धःशु
क्लेइकारस्योदयः समस्तस्वरःस्तनाद्वद्धोजयप्रदः देवत्तस्य
जीवस्वर ओंकारःतद्वलात्वैशाखमाद्रपदमार्गेषुअकारस्य
उदयः तेमासाःकुमाराख्याः युद्धेबलेदेवदत्तस्य आषाढश्रा
वणाश्विनमासेषुइकारउदयतिजीवस्वरबलायुवाख्यामासाः
युद्धेदेवदत्तस्यजयदाः चैत्रपौषयोस्तुकारोदयः तौजीवस्वर
बलाद्वृद्धौ देवदत्तस्ययुद्धेभंगप्रदौज्येष्ठकार्तिकमासएकार
स्योदयःजीवस्वरबलात्मृत्युमासौदेवदत्तस्ययुद्धेमृत्युदौ इति
मासिबलाबलं देवदत्तस्यरेवतीप्रथमपादेजन्मसमयत्वात्
मीनराशपाधिष्ठितत्वात्राशिस्वरओकारएवतद्वलात् अत्र

अह्रेपिंडस्वरोज्ञेयोयोगोद्वादशवार्षिके १९ ॥

स्वरेःकारोदयेकुमारोदयः तत्रसत्ततोजयः अत्रस्वरेउकारेयुवा
ख्येअसत्ततोजयः उकारेअत्रस्वरोदयेवृद्धाख्येयुद्धेदेवदत्तस्यपराज
यः एकारेअत्रस्वरेप्राप्तेराशिस्वरबलात्मृत्युः देवदत्तस्यनक्ष
त्रस्वरोऽकारः अकारस्वरबलात् अस्वरोदक्षिणोस्वामीतिन्यायात्
अयनस्वरोबालः दक्षिणस्वरःकुमारः बालायनस्वरेयुद्धेभंगः
कुमारस्वरेसत्ततोजयः अह्रेपिंडस्वराज्ज्ञेयाइतिन्यायात्देवद
त्तस्यपिंडस्वरउकारः तद्वलाद्वार्षिकाकारस्वरोदयेमृत्युस्वरोद
येतद्वर्षेयुद्धेमृत्युः एवमिकारस्योदयेवालेपराभवः उकारेवा
र्षिकस्वरोदयेकुमाराख्येसत्ततोजयः एकारेवार्षिकस्वरोदये
सर्वजयः ओंकारेवार्षिकस्वरेवृद्धाख्येयुद्धेपराजयः अथदेवद
त्तस्ययोगस्वरउकारः तद्वशाद्वादशवार्षिकस्वरेउकारेबालसंज्ञ
केयुद्धेपराजयः अकारेद्वादशवार्षिकेपिंडस्वरात्कुमाराख्येस
त्ततोजयः इकारेद्वादशवार्षिकस्वरेयोगस्वरात्युवाख्येयुद्धे

सर्वजयः उकारोद्वादशवार्षिकोदये योगस्वरबलाहृद्धाख्येसक्त
तःपराभवः एकारद्वादशवार्षिकःस्वरोदयेस्तत्ताख्येसक्ततोमस्तुः
एवंबलानिपुद्धेदेयान्ति १९ अथसर्वस्वरवलान्ययमन्यइदमेव
सर्वकालेसर्वस्माद्बलवत्तरंवलमाचष्टे सर्वकालेवलीवर्णइति
एतावतावर्णस्वरवलादेवसर्वकालेषुद्वादशवार्षिकअयनर्त्तु
मासपक्षदिननाडीषुसर्ववादजेयेवलावलंकुर्यात् २० पुनरे

सर्वकालेबलीवर्णःसर्वव्यापीनसंशयः त
स्मात्सर्वप्रयत्नेनवर्णेवीक्ष्यंबलाबलं २० यथा
पदोहस्तिपदेप्रविष्टाययथाहिनद्यःखलुसागरे
षु यथाहरेर्देहगताश्चदेवास्तथास्वरावर्णफ
लोदयस्थाः २१ साधनंमंत्रयंत्रस्यतंत्रयोगंच
सर्वदा अयोमुखानिकार्याणिमात्रास्वरबलेकु
रु २२ वर्णस्वरबलेसर्वंकर्तव्यंचशुभाशुभं सि
त्यिदंसर्वकार्येषुयुद्धकालेविशेषतः २३ मार
णंमोहनंस्तंभंविद्वेषोच्चाटनेवशं विवादंवि
ग्रहंघातंकुर्याद्धह्रस्वरोदये २४ अन्नपानादि
कंसर्ववस्त्रालंकारभूषणं विद्यारंभविवाहं
चकुर्याज्जीवस्वरोदये २५ प्रासादारामहर्म्या
णिदेवतास्थापनंतथा राज्याभिषेचनंदीक्षाक
र्तव्याराशिकेस्वरे २६

तद्बलेसमर्थयन्नाह यथापदेति स्वराःवर्णवलेनवलिनः अब
लेनाबलाः २१ अथतेषांकथनेनकिंप्रयोजनमित्याहसाधनंमंत्र
यंत्रेति २२ वर्णःस्वरेति २३ मारणंमोहनमिति २४ खानपानादि
कंसर्वमिति २५ प्रासादारामेति २६ ॥

न॰ म॰
टी॰
२९

शांतिकंपौष्टिकमिति २७ शत्रूणांदेशभंगमिति २८ योगेनेति २९
इतिषोडशस्वरविवरणं तिथिवारंचनक्षत्रमिति तिथिस्वरोदयःवा
रस्वरोदयःग्रहस्वरोदयःनक्षत्रस्वरोदयः पर्यायउदयाःपृथक्पृथ
कुङक्रमायत्रवर्णस्वरवशात्तिथिवारनक्षत्राणांत्रयाणांपुवाल
भ्यते यात्रासुयुद्धे॰वादेचविशेषतः १ अथैषांयंत्रमिलनेमृतल

२०

शांतिकंपौष्टिकंयात्राप्रवेशबीजवापने स्त्रीवि
वाहेतथासेवाकर्तव्यामस्वरोदये २७ शत्रूणां
देशभंगंचकोटयुद्धेचवेष्टने सेनाध्यक्षस्तथा
मैत्रीकर्तव्यःपिंडिकोदये २८ योगेनसाधयेद्यो
गंदेहस्थंज्ञानसंभवं प्राणिवंशाभवंचैवशाक्ते
येवक्तनीयकं २९ इतिस्वरोदयषोडशस्वरविव
रणं तिथिवारंचनक्षत्रंपृथक्पृथक्प्रभाषि
तं यत्तदेकत्रसंमील्यकुर्यादृर्णस्वरोदयः १ य
स्यनामादिमंवर्णंतिथिवारर्क्षजंमृतं तद्दिनंव
र्जयेत्तस्यहानिर्मृत्युकरंयतः २ अनेनस्वरयोगे
नशत्रूणांमारणादिकं मंत्रयंत्रक्रियाहोमंसा
धयेत्तद्दिनेबुधः ३ इतितिथिवारनक्षत्रस्वरच
क्रं बालस्वरादिकावस्थाभानुसंख्याभवंतिताः
उदयंतेक्रमेणैवस्वस्वभुक्तिप्रमाणतः १ ॥

तुणं भवेत्तद्दिनवर्ज्यमित्याह यस्यनादिमंवर्णमिति १ अनेनेति
यद्दिनेतिथिवारर्क्षजंमृतमितिलभ्यतेशत्रोर्नामवशेन तद्दिनेमं
त्राभिचारेणशत्रुंसाधयेदित्यर्थः ३ इतितिथिवारनक्षत्रस्वरबलं ।
अथबालकुमारादीनांसंख्याप्रमाणमाह बालस्वरादिकावस्थे
ति १ ॥

द्वादशावस्थाः कुत्र भवंत्याकांक्षयाह घटिकाख्येति २ घटिकादि
कालेऽवस्थानां स्थितिप्रमाणमाह भयलेति ३ भुक्तस्वरेति अथ
बालादीनां प्रत्येकं द्वादशावस्थोदाहरणं चैत्रशुक्लप्रतिपदायु
क्तघटिका ३३ दिनावस्थाहारप्रमाणं पंचषष्ठ्यः पंचहारेण प्राप्ताः
षडवस्था भुक्ता ६ शेषं घटीसप्तमावस्था विद्यते यस्य प्रतिपद्बा
लसंज्ञा ऽऽ कुमार· युवा· वृद्धा· मृताश्चतत्र· बालासप्तमी राज्य
दा कुमाराख्या शांतिकरी ७ सकामतुष्टिर्युवाख्या· वृद्धाख्या रात्रि
निद्रा मृताख्या वह्निदाहा एता बालाद्यावस्था पंचघटीप्रमाणेन

इति तिथिवारनक्षत्रस्वरचक्रं ॥

घटिकाख्ये दिने पक्षे मासे ऋत्वयने तथा वर्षे
द्वादशवर्षे च अवस्था जायते स्वरे २ भयला
ति घटीपंचमात्रा द्वादशोर्ध्वं दिनद्वयं युग्मषट्कं पक्ष
मासाद्यमवस्थाप्रमितिः क्रमात् ३ भुक्तस्वरप्र
माणेन स्वस्वभोगेन तद्[illegible]त् गतावस्थागतां
केन शेषं तत्कालजा मता ४ ॥

त्रयस्त्रिंशद्घटिकास्तनिर्णीताः तत्र देवदत्तस्य दिनचर्या यावणे स्व
रउकारे वशेन देवदत्तस्य प्रतिपत् कुमाराख्या· तद्बलास्य देवदत्तस्य
शांतिकरी अवस्था भविष्यति अनेनोदाहरणेन सर्वेषामवस्थाफ
लानि ज्ञेयानि एतानि पंचावस्थाफलानि द्वादश द्वादश संख्यानि स्व
स्वभुक्तिप्रमाणेन घटिकाख्ये दिने पक्षे मासे ऋत्वयने तथेत्यादि
समयेषु वक्तव्येत्यर्थः ४ ॥

न॰ प॰
टी॰
३१

प्रथमावस्थानिरूपणमाह मूलाचबालाचेति ५ स्वस्थेति ६ उत्साहे
ति ७ वैकल्पशोकेति बुद्धिभ्रंशादिति ८ छिन्नाचेति ९ व्रणांकि
तेति १० एवमिति इतिबालस्वरादीनांषडवस्था युद्धादिषुस्व
स्वबलमाह पूर्वस्मिन्स्वरेति १ यस्यांदिशीति पंचमीदिशंवर्जं

मृताच १ बाला २ शिशु ३ हासिकाच ४ कुमा
रिका ५ यौवन ६ राज्यदाच ७ क्लेशाच ८ नि
द्रा ९ ज्वरिता १० प्रवासा ११ मृताच १२ बाल
स्वरजाअवस्थाः ५ स्वस्था १ शुभा २ मोद ३ नि
र्हर्ष ४ तृप्ति ५ महोदया ६ शान्तिकरी ७ सद
र्पा ८ मेदा ९ क्षमा १० शान्तगुणोदयाच ११ मां
गल्यदा १२ द्वादशधाकुमारे ६ उत्साह १ धैर्यं
२ श्री ३ जया ४ बलाच ५ संकल्पयोगाच ६ स
काम ७ तुष्टिः ८ सखाच ९ सिद्धा १० चयने
श्वरीच ११ शान्ताभिधा १२ द्वादशधायुवाख्ये ७
वैक[ल्यं] १ शोषाच २ तथाचमोहा ३ सुप्तेन्द्रिया
४ दुःखित ५ रात्रि ६ निद्रा ७ बु[द्धि]भ्रंशाच
८ तपाच ९ क्लिष्टा १० ज्वरा ११ मृता १२ द्वादश
धाचवृद्धे ८ छिन्ना १ चंचला २ रिपुघातकारी
३ शोषा ४ मही ५ ज्वालन ६ कष्टदाच ७ व्रणां
किता ८ भेदकरीच ९ दाहा १० मृत्युः ११ क्षया
१२ द्वादशमृत्युजाइमाः ९ ॥

येदिग्यत्रमात्रायत्रस्थौस्वराः तेषांकस्यबलेनदिशंपंचमीस्वतांवर्जये
त् किमपिनोक्तं अतएवज्ञायतेकवेरभिप्रायः वर्णस्वरादेव यौव
नस्वरोयस्यतस्यमात्रादिक तत्पंचमीवर्जयेत यथादेवदत्तस्यवर्णे
स्वरओकारः ओंकारस्यमध्येस्थितिः मध्यात्पादक्षिणेपनदेवदत्तस्य

पंचमीदिक् उत्तरा· देवदत्तउत्तरांयात्रांयुद्धेविवादेचसर्वदावर्ज
येत् संग्रामेसेनामध्येतांदिशंनसमाश्रयेत् २ अथदिक्स्वरोस्त
मितेप्रश्नफलमाह एकैकेएकैकइति ३ इतिदिग्गतस्वरचक्रम्
तिथ्यादाविति तिथ्यादौतिथिप्रारंभसमयेनदादितोयोतिथिः

स्वरावस्थाभोगचक्रं

अथदिग्गतस्वरचक्रं।

एवंषष्टिरवस्थास्तुरवस्थापंचकेसदा सर्वा
स्तानास्तविज्ञेयेस्वनामसदृशंफले १° इतिबा
लस्वरादीनांषष्टीस्वरावस्थाः पूर्वस्मिन्अ
स्वरःस्वामीइस्वरोदक्षिणेतथा उकारःपश्चि
मेज्ञेयएसोम्येमध्यओस्वरः १ यस्यांदिश्युदयं
यातिस्वरस्तत्पंचमीदिशं वर्जयेत्सर्वकार्ये
षुयात्राकालेविशेषतः २
स्वरः तस्मात्स्वरात्साहं ५॥२७ पंचघटीस्वरउदयति चेत्पूर्वस्य
बालकुमारादिलक्षणोघटीस्वरोभवति तस्यप्रश्नःफलंब्रवीमि
१ तत्करणमाह तिथिभुक्तघटीति उदाहरणं चैत्रशुक्लप्रतिपदि
अस्वर स्योदयः तिथिभुक्तसंख्याघस्यःपंचदश १५ तस्यपलानित
वशतानि ९०० अत्तवहि ३२७ एतानिलब्धंस्वरहयं २ शेषं २४८
शेषेअकारात्तृतीयस्वरःउदितः यदिदेवदत्तेनप्रश्नफलवक्तुस
मीपात् प्राक्दक्षिणपश्चिमेवाउत्तरेवास्थितेनप्रश्नःकृतः सर्व
तोभद्रचक्रोक्तलक्षणेनास्तमितादिक् यत्कार्यमुपलक्ष्यप्रश्नस्त
दातत्कार्यहानिर्वक्तव्या संग्रामादिसाहसकर्मणिभयंभगः
युद्धेमरणंनैरुज्यप्रश्नेमरणं इत्यादीनिवदेत् २ ॥

अथ वामादिकं बालाद्यात दर्थमाह यद्वद्दिश्यश्नेति यदि देवदत्तेना
न्यमुद्दिश्य प्रश्नः कृतः यत्तदत्तस्येदं कार्यं भविष्यति तदा यज्ञदत्त
वर्णस्वरवशेन बालाद्यादिदिशमवधार्य फलं ब्रूयात् यदि लाभा
दिकं नोक्तं कस्याप्यभिधानमपि न तदा देवदत्तस्यैव नामस्वर

पृच्छते पृच्छकस्यास्तु स्वरस्यास्तमितो दिशो
हानिर्मृत्युर्भयं भंगो जायते नात्र संशयः ३ उ
तिदिशा स्वरचक्रे तिथ्यादावुदयं याति तिथि
स्वराद्घटिकास्वरः बालस्वरादिकः प्रश्ने फलं
तस्य वदाम्यहं १ तिथिभुक्तघटीसंख्यां कृत्वा प
लमयीं ततः ऋतुवह्नि ३२७ हृते शेषे स्वरस्त
त्कालसंभवः २ यद्वद्दिश्य कृतः प्रश्नः फलं त
स्य प्रजायते यत्र नोद्दिश्यते किंचित्तत्र पृष्टः शु
भाशुभं ३ बालोदये यदा पृच्छा लाभार्थं स्वल्प
लाभदा रुग्जाते चिररोगं च गमे हानिः क्षयं रणे
४ कुमारोदयवेलायां लाभो भवति पुष्कलः
रुग्नाशो जयं युद्धे यात्रा सर्वत्र सिद्धिदा ५ यु
वोदये भवेद्राज्यं लक्ष्यच्छेदं च तत्क्षणात् संग्रा
मे शत्रुहंता च यात्रा च सफला भवेत् ६ वृद्धोदये
न लाभः स्यात्क्लेशी नाक्लेशावधेन संग्रामे भंग
मायाति यात्रायां न निवर्तते ७ मृतोदये यदा प्र
श्नः पृच्छति स्वप्रयोजनं तत्सर्वं मृत्युदं ज्ञेयं युद्धे
मृत्युः सभंगकः ८ ॥

वशेन अस्तमितबालादिदिशो ज्ञात्वा फलं ब्रूयात् ३ अथ बाला
दिस्वरबलमाह बालोदयेति ४ कुमारेति ५ युवोदयेति ६
वृद्धोदयेति ७ मृतोदयेति ८ ॥

अथ स्वराणां संज्ञांतरमाम्नायपद्यमाह ओजःस्वराः अउ ओं एते त्र
यो विषमाः पुमांसः पुरुषाः समस्वराः इ ए अन्येपि समस्वराः योषि
त्स्त्रीसंज्ञकाः स्वस्वरोदये विषमाख्यः पुरुषः स्वरोदये पुंसां बलं भ
वति स्त्र्याख्यसमस्वरोदये स्त्रीणां स्त्रीजातीनां बलं भवति एताव
त् स्वस्वस्वरोदये तत्तदाख्यकार्याणि सिद्धिं यांति ९ तद्बलात् पृथ
क् पद्यमाह गर्भार्थे इति प्रष्टा पृच्छति अस्मिन् गर्भे पुत्रः पुत्री वा
भविष्यति तस्मिन्नतितत्काले अकारस्य उकारस्य ओकारस्योदयो
भवति तदा पुत्रो भविष्यतीति वाच्यं तत्काले· इ· ए· अनयोरुदय
स्तदा गर्भप्रश्ने कन्या वाच्या युग्मे युग्ममिति पुंस्त्र्याख्यस्वरोदये यु

ओजस्वराः पुमांसः स्युः स्त्रियो युग्मे स्वरान्विदुः
स्वस्वस्वरोदये जाते पुंसां स्त्रीणां बलं भवेत् ९ ग
र्भार्थे पुंस्वरे पुत्रः कन्या कन्यास्वरोदये युग्मे यु
ग्मं द्वये नष्टे मातृमृत्युश्च संक्रमे १० युनाडीस्व
युर्व्योमांगुलेन हि ४९ पृथ्वी पीता सितं वारि रक्त
वर्णं धनंजयः मारुतो नीलजीमूतमाकाशं व
र्णपंचकं ५० पीतवर्णं चतुष्कोणं मध्ये पृथि
वीपुरं वमध्ये षट्दलाकारं श्वेतं वारुणमंडलं ५१

र्णज्ञानार्थं पृथिव्यादीनां वर्णमाह पृथ्वी पीतेति प्रश्ने विषयगते पृ
थिव्यादिवर्णेन वर्णं वदेत् सुगमं ५० अथाचार्यैः पंचतत्त्वानां भेदनामा
न्याह पीतवर्णं चतुष्कोणमिति पंचतत्त्वस्य पृथक्भेदा आगमे प्रोक्ताः
यरलवह वर्णमंत्रबीजमुक्तं अत्र पार्थिवादिपंचतत्त्वरूपेण युंजीत पु
क्षाकिल यत्र यत्रेति तत्र तत्त्वस्वरूपमष्टकत्तरं दद्यात् अत्र प्रश्ने चिंति
तादिप्रश्ने पृथिवीतत्त्वेन पीतवर्णं चतुष्कोणं वस्तु वदेत् जलतत्त्वेन
षट्कोणं श्वेतं वस्तु वदेत् रक्ताभं त्रिकोणं वह्नितत्त्वेन अष्टकोणं हरि
तं वायुतत्त्वेन वदेत् धूम्राभं वर्तुलं व्योमतत्त्वेन वदेत् अन्यदपि यत्रया
ष्टपीपुत्रिकं घटते स्फुरति तत्र स्वयुक्त्या प्रश्नोत्तरं दद्यात् अन्यच्च योगशा
स्त्रे वामदक्षिणचंद्रसूर्यस्वरयोर्भेदेन शरीरमुक्तं सर्वेषामेव जंतूनां
मूर्ध्नि तिष्ठति चंद्रमाः अधोभागे रविः प्रोक्तो मस्तु काले विपर्ययात्

योनिः स्त्रीणां भवेच्चंद्रो नराणां सूर्य उच्यते उभौ तौ सृष्टिसंहारौ जंतूनां ना
न० प० त्र संशयः स्वगमौ नात्यंतिकं प्रयोजनिकौ ५१। ५२। ५३। ५४। ५५। ५६
टी० इति पाठकश्रीहरिवंशात्मजमहादेवविरचितायां नरपतिजयचर्याटी
३८ कायां जयलक्ष्म्यां हंसचाराध्यायो द्वितीयः २ भेदाये स्वरपंचकेति १ इति

रेफयुक्तं त्रिकोणं च रक्ताभं वह्निमंडलं स्वरूपं त्रेय
मध्यस्थं हरितं वायुमंडलं ५२ हमध्यवर्तुलाका
रं धूम्राभं व्योममंडलं पंचतत्त्वेषु भेदाय कथितः
सर्वसूरिभिः ५३ मारणमोहनस्तंभविद्वेषोच्चाट
नवशप्रेरणाकर्षणं क्षोभभानुनाऽभ्युदये कुरु
५४ शांतिकपौष्टिकं क्षेमं दिव्यौषधिरसायनं यो
गाभ्यासादिकर्माणि कर्तव्यानि निशाकरे ५५ चं
द्रसूर्यस्वराभ्यासं ये कुर्वंति सदा नराः अतीतानाग
तं ज्ञानं तेषां हस्तगतं सदा ५६ इति श्रीयामले स्व
हंसस्वरोदयप्रकरणं ॥ इति श्रीब्रह्मयामलीयस्व
रोदये हंसचारो नाम द्वितीयोऽध्यायः २ भेदाय स्वर
पंचके निगदितानैसर्गिकाः कालजास्तथा बाल
कुमारयौवनजरा नैयन्यवस्थास्तथा नानुजानंति
गुरूपदेशविधिना भेदप्रभेदाश्रये न जानंति फ
लं शुभाशुभमयं कालत्रये निश्चितं १ इदं प्रथम
मंगं अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकं वि
ख्यातं सर्वतोभद्रं सद्यः प्रत्ययकारकं १ ऊर्ध्वगा दश
विन्यस्तास्तिर्यग्रेखास्तथा दश एकाशीतिपदं चक्रं
जायते नात्र संशयः २

प्रथममंगं समाप्तं अथातः संप्रवक्ष्यामीति अथानोऽनंतर्यार्थे हंसचारानं
तरं सर्वतोभद्रनामचक्रं प्रवक्ष्यामि किंविशिष्टं त्रैलोक्यदीपकं दीपवद्दी
पकं त्रैलोक्यं दीपयति प्रकाशयति घटपटादिवत् त्रैलोक्यदीपकं विख्या
तं लोकप्रसिद्धं तेन च ही पदेशाख्यापि सद्यः प्रत्ययकारकं विचार्यमाण

शुभाशुभकप्रतीतिकारकं २ अथ चक्रन्यासमाह ऊर्ध्वगादृशाविन्यस्ये
ति स्वगमां २ अकारादीति चक्रं प्राङ्मुखोपविश्य लिखेत् नैरृत्यन्त
स्वरा अकारादिअःपर्यन्ताः स्वरा लेख्याः कुत्रेत्याकांक्षयाह ईशादौ विदि
शिक्रमात् तत्रक्रमः अकार ईशानकोणे· आकार आग्नेये इकारं नैरृ
त्ये ईकारो वायव्ये पुनरुकार ईशानकोणे अकारस्याधः ऊकारस्त्वाग्नेये
आकारस्याधः एवं षोडशस्वरान् ईशानादिचतुष्कोणेष्वेव विन्यसेत् ए
वं लिख्यमानेषु स्वरेषु सृष्टिमार्गेण चतुर्भ्रमं चतुरावृत्त्या स्वरलिखनं स्या
त् ३ स्वरलिखनादनन्तरं नक्षत्रलिखनमाह कृत्तिकादीनीति स्वरलिखि
नकोष्ठकोनत्रिदिक्षु सप्तसप्त लिखेत् यथा नक्षत्र पूर्वस्यां प्रथमपङ्क्तौ
सप्त ७ तदधः पश्चात्तु नक्षत्रदधो यः कोष्ठस्तदधः एककोष्ठकं एवं चतु

अकारादिस्वराः कोष्ठे ईशादौ विदिशिक्रमात् सृ
ष्टिमार्गेण दातव्याः षोडशैवं चतुर्भ्रमं ३ कृत्तिका
दीनि धिष्ण्यानि पूर्वाशादि लिखेत्क्रमात् सप्तस
प्तक्रमादेतान्यष्टाविंशतिसंख्यया ४ अवकहडा
दिषु प्राच्यां मटपरतास्तु दक्षिणे नयभजखाश्च वा
रुण्यां गसदचलास्तथोत्तरे ५ वृषस्त्रयोऽहषाद्या
श्च पूर्वाशादिषु ते क्रमात् राशयो द्वादशैवं तु
षाद्याः सृष्टिमार्गतः ८ ॥

र्दिक्षु कोष्ठकाउहता ज्ञातव्याः तत्र प्राक् सप्त कृत्तिकादीनि लिखेत् म
घादि सप्त दक्षिणस्यां लिखेत् मैत्रादिसप्त पश्चिमायां लिखेत् धनिष्ठा
दिसप्त उत्तरस्यां लिखेत् ४ अथ नक्षत्राधःकोष्ठलिखनमाह अवक
हडेति अवकहडाः पंचवर्णाः नक्षत्राधः पंचकोष्ठके पुप्राच्यां लिखे
त् मटपरताः पंचवर्णाः दक्षिणनक्षत्राधः पंचकोष्ठे लिखेत् नयभ
जखाश्च वर्णान् पश्चिमनक्षत्राधः पंचकोष्ठे लिखेत् गसदचलान् पं
चवर्णान् उत्तरनक्षत्राधः कोष्ठे लिखेत् ५ अथ पूर्वाशादितृतीयपंक्तौ
त्रिकोष्ठे लिखनीयमाह वृषस्त्रयोऽहषाद्येति वृषादित्रीन् राशीन् पू
र्वदिक्कोष्ठे लिखेत् सिंहादित्रीन् दक्षिणकोष्ठे लिखेत् वृश्चिका
दित्रीन् पश्चिमायां लिखेत् कुंभादित्रीन् उत्तरस्यां लिखेत् ८ ॥

न॰प॰
टी॰
३५

39

अथशेषेषुलिखनीयमाह शेषेष्विति शेषेषुचतुर्दिक्षुउद्धृतेष्वेकैकचतुः
कोष्ठेषुसैकमध्यकोष्ठेषुप्रतिपन्नंदातिथिपंचकंक्रमेणलिखेत् प्रतिप
त्पूर्वकोष्ठेलिखनीया द्वितीयादक्षिणकोष्ठे तृतीयापश्चिमेचतुर्थीउत्त
रेपंचमीमध्ये एवंषष्ठ्यादिनंदापंचकंपूर्वाशादिलिखेत् तथैकादश्या
दिपंचकंपूर्वाशादिलिखेत् एवंकृतेपंचमीदशमीपौर्णिमेतित्रिपूर्णा
मध्येलिखिताभवंति वाराणामिति भौमादिक्रमेणवाराणांसमकंले
ख्यं वारलिखनेनंदादितिथिनामाह मुक्तेतेनकिंयेषुकोष्ठेषुनंदादयो
लिखितास्तेष्वेवभौमादीन्लिखेत् तत्रचभौमंनंदायांलिखेत् बुधंभ

शेषेषुकोष्ठकेष्वेवंनंदादितिथिपंचकं वाराणां
समकंलेख्यंभौमादिस्तुक्रमेणच ७ भौमादित्यौ
चनंदायांभद्रायांबुधशीतगू जयायांचगुरुःप्रो
क्तोरिक्तायांभार्गवस्तथा ८ पूर्णायांशनिवारश्च
लेख्यश्चक्रेत्रनिश्चितं इत्येषसर्वतोभद्रविस्तारःकी
र्तितोमया ९ ऊर्ध्वदृष्टिश्चभौमार्कौ ३।१ केकरौबु
धभार्गवौ ४।६ समदृष्टिश्चजीवेंदू ५।२ शनिरा
हू ७।८ रधोदृशौ १० नीचस्थितोर्ध्वदृष्टिश्चउच्चेर
धोनिरीक्षयेत् समश्चपार्श्वतोदृष्टिस्तिर्यग्दृष्टिःप्र
कथ्यते ११ शन्यर्कराहुकेत्वाराःक्रूराःशेषाःशुभ
ग्रहाः क्रूरयुक्तोबुधःक्रूरःक्षीणचंद्रस्तथैवच १२
यस्मिन्नृक्षेस्थितःखेटस्ततोवेधत्रयंभवेत् ग्र
हदृष्टिवशेनात्रवामसन्मुखदक्षिणे १३ ॥

द्राकोष्ठकेलिखेत् गुरुंजयाकोष्ठेलिखेत् शुक्रंरिक्ताकोष्ठेलिखेत् शनिंपू
र्णातिथिकोष्ठेलिखेत् पुनःरविंभौमेनसह चंद्रंबुधंभद्राकोष्ठेलिखेत् वा
रांतेलिखितेसर्वतोभद्रंसंपूर्णंभवति तथाचक्रादिरेवाह इत्येषसर्वतोभद्र
प्रस्तारःकीर्तितोमया सर्वशास्त्रानुसारेणयथोक्तंब्रह्मयामले सुगमं
७।८।९।१०।११ अधुनाचक्रविचारणायग्रहाणांक्रूरसौम्यविभागमाह
शन्यर्कराहुरिति सुगमं १२ अथग्रहदृष्ट्यावेधविचारमाह यस्मिन्नृक्षेति

ग्रहस्थितनक्षत्रात् ग्रहदृष्ट्या वेधत्रितयं भवति यतो ग्रहाणां त्रिविधा
दृष्टिः एकया दृष्ट्या सन्मुखं विध्यति एकया दक्षिणे विध्यति एकया वामे
विध्यति १४ । १४ यथा त्रिविधदृष्ट्या त्रिविधो वेधस्तथा तल्लक्षणमाह वक्र
गे दक्षिणेति पृथक् पृथक् त्रिविधा दृष्टिर्भौमादीनां पंचानां भवति य
तो भौमादयः पंच वक्रिणो भवंति शीघ्रगा भवंति मध्यगा भवंति । अ
तस्त्रिविधया दृष्ट्या त्रिविधो वेधः प्राक्कुलोके वेधत्रयं भवेत् इत्यत्र विशे
षः ग्रहः सव्यापसव्येन चक्षुषा वेधयेत्पुनः अत्राक्षरस्वरादींस्तु सन्मु
खेनान्यमक्षरमिति एके आचार्याः सव्यापसव्येन चक्षुषा नक्षत्रवर्णा
स्वरादीन्वेधयेत् सन्मुखेन ग्रहोऽन्यं भं नक्षत्रमेव विध्येत् तथा चास्मि
न्नर्थे रणहस्तिसंज्ञग्रंथे श्लोकाः वेधमेव कथयति वक्रगमने तथा

भुक्तं भोग्यं तथाक्रान्तं विद्धं क्रूरग्रहेण भं शुभाशु
भे शुभकार्येषु वर्जनीयं प्रयत्नतः १४ वक्रगे द
क्षिणा दृष्टिर्वामदृष्टिश्च शीघ्रगे मध्यचारे तथा
मध्या ज्ञेया भौमादिपंचके १५ सूर्यमुक्तादुदीयं
ते सूर्यग्रस्तास्तगामिनः ग्रहाद्वितीयगे सूर्ये स्फु
रद्बिम्बाः कुजादयः १६ ॥

ऊँ वक्रकन्यारं स्वातिमेव च अश्विनी रोहिणी संध्योऽभिजितं हंति पापकः
कं कुलीरं हरिं पंच चित्रा मूले च रेवती सौम्यस्यो हंति पापात्मा वेस्थ
वधुरतस्थितमित्यादि सर्वत्रावगंतव्यं १५ अथाचार्यो ग्रहगणितं वि
माग्रहाणां मंदशीघ्रवक्रगतिलक्षणमाह सूर्यमुक्तादुदीयंत इति
प्रथमतो रविमंडलगता अस्तमयंति ततो रवेर्मुक्ता उदयंति अर्की
तस्त्वर्काक्रांतराशितो द्वितीयस्था ग्रहाः शीघ्रगाः शीघ्रगतयो भवंति
अर्कात्तृतीयगास्तृतीयराशिस्थाः समाः समगतयः भानावर्के चतुर्थ
राशिस्थे मंदा भवंति समगतिभ्यो मध्यगतिभ्यो न्यूनागतिः अतो मंद
गतयः पंचमषष्ठे सूर्ये ग्रहा वक्राः स्युः अर्थादर्के पंचमषष्ठराशिस्थे
भौमादयः पंच वक्रगतयो भवंति केचित्तु रवेः सकाशात्तु नवाष्टके

न॰प॰
टी॰
ध॰

५०

सप्ताष्टमस्थाने त्वतिवक्रा भवंति नवमे दशमे वक्राः स्युः भानौ ग्रहाणां कु
टिला गतिर्जायते द्वादशैकादशस्थे ग्रहाः शीघ्रगा भवंति एतेन वक्र
शीघ्रमध्यगत्या ग्रहाणां त्रिविधा दृष्टिर्भवति अत एवोक्तं वक्रगे दक्षिणा
दृष्टिरित्यादि १६। १७। १८ अविशेषग्रहाणां विशेषगतिमाह राहुकेतू
सदा वक्राविति राहुकेतू सदैव वक्रिणौ पश्चात्सदागतयः चंद्रभास्करौ
शीघ्रावेव एवं रविचंद्रराहुकेतूनां गतेरेकस्वभावः रविचंद्रयोः
शीघ्रैव गतिः राहुकेत्वोर्वक्रैव एकस्वभावाद्गतेः सदा दृष्टित्रयं त्रि
भिरेव दृष्टिभिर्वामसन्मुखदक्षिणाभिरेते चत्वारः पश्यंति केष्वेवं यथा
यस्य गतिर्भवति तथैव गत्यावेधोपि तेन रविचंद्रौ सदैव शीघ्रगौ तयो
र्वामा दृष्टिः राहुकेत्वोर्वक्रा दृष्टिः वक्रत्वाद्दक्षिणे च दृष्टिः तथा चरणाह

समात्तृतीयगे त्वेषां मंदा भानौ चतुर्थगे वक्रास्सा
त्वचषष्ठेके त्वतिवक्राष्टसप्तमे ९ नवमे दशमे
भानौ जायते कुटिला गतिः द्वादशैकादशस्थेर्ये भ
जंते शीघ्रतां पुनः स्वदृष्टपतां पुनर्लोके व्रजंत्यर्क
गता ग्रहाः १८ राहुकेतू सदा वक्रौ शीघ्रगौ चंद्रभा
स्करौ गतेरेकस्वभावत्वादेषां दृष्टित्रयं सदा १९
क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः स्युः
सहजस्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः २०

क्षिः वक्रोदक्तं कर्णगत्यापथवामं शीघ्रो विध्येद्दीप्तते ग्रे समस्त नित्यं वक्रौ
राहुकेतू रवींदू नित्यं शीघ्रौ दृष्टपयात्वल्परूपौ १९ अथान्यदाह क्रूराव
क्रेति सौम्याः शीघ्राबलिष्ठाः स्युः क्रूराः शीघ्राबलोज्झिताः क्रूराः पापाः
क्रूरं दंडं कुर्वंति स्वभावोयं पापानां सौम्याः शुभग्रहाः शुभमेव कुर्वंति
ते च पापाः क्रूरा वक्रा यदि भवंति तदातिशायेन क्रूरा भवंति सौम्याः शु
भा यदि वक्रा भवंति तदा महाशुभाः स्युरिति सौम्याः शीघ्रगा यदि स्युर्भवं
ति तदा सहजस्वभावस्था भवंति यः साहजिकस्वभावस्तत्रस्थाः शीघ्रा
स्तेनो भवंति शुभं स्वभावेन कुर्वंति किं तु वक्राः सन्तो यथातिशुभं कुर्वं
ति तथा न एवं क्रूराश्च शीघ्रगाः शीघ्रगतयः स्वस्वभावेन स्थिता भवं
ति मंगलस्य यः स्वभावः सः स्वस्वभावेन फलदायकः तथा च जातके

वक्रिणस्तु महावीर्याः शुभा राज्यप्रदा ग्रहाः पापा व्यसनदाः पुंसां कुर्वंति
च हर्षपादनं ह्यथा स्वदर्पणायां शुरुषं भ्रामयंति इत्यस्तेन भ्रमयंति २० अ
पुनर्वेधमाह अवर्णादिस्वराविति स्वरयुक्त आत्मायोरनुस्वारवि
सर्गयोः तयोरपि वेधेन द्वयोरिव वेधो ज्ञातव्यः यतो ह्यावकारसहिता
वुच्चार्येते अकारं विना तयोरुच्चारणमशक्यं २१ अथ वर्णवेधे वि
शेषमाह अथ चक्रे पवर्गीयबकार उक्तः यवर्गीयसकार उक्तः स व
र्गीयो षकारः सकारो यदि कस्यापि नाम्नि पवर्गीयो वकारः तालव्यः
र्गीयो षकारः सकारो यदि कस्यापि नाम्नि तदा तेषां वेधः अक्रोक्त व
र्गावर्गीयः षकारः कवर्गीयः खकारः स्यात् तदा तेषां वेधः

सर्वतोभद्रचक्रम् ॥

अवर्णादिस्वरौ
द्वौ ह्रावेकवेधे
द्वयोर्बधः स्व
रयुक्तात्मनोर्वे
धस्त्वानुस्वार
विसर्गयोः २१
बवौ षसौ श
खौ चैव वत्सेयौ
इञौ परस्परं एकेन द्वितयं ज्ञेयं शुभाशुभं खगाद्य
ये २२ चङच्छाः ण्णाठाश्च वेधे यफढास्तु इजा स्त
या एतत्त्रिके त्रिकाविद्धं विद्धैः कपदमैः क्रमात् २३

स एव वेधः पुनरुच्यते चङच्छाः
सवेधेनैव वेधो ज्ञातव्यः २२ स एव वेधः पुनरुच्यते चङच्छाः
खणठा इति एते वर्णाः चङच्छादयो न दृश्यन्ते चरणस्याः ङचङछ
खणठा इति एते वर्णाः चङच्छादयो नक्षत्रचरणस्थाः ङचङछ
शाद्री पुष्यणठहस्त भ्रुयफढस्वातीषाढा इयघङमङजरामाद्र प
दा शाद्री हस्त स्वातीषाढोजराभाद्रपदानां चरणवर्णाः तेषां मध्ये
कपमदएववर्णाश्चक्रे निवेशिताः तेषां वेधे अपरे त्रयो वर्णा वेधि
ताभवंति २३ ॥

तथा चाह घङछा रौद्रगे इति आर्द्रानक्षत्रगते पापे शुभे च घङछा वर्णा विद्धा भवन्ति हस्तस्थे ग्रहे षणढा वर्णा विद्धा भवन्ति पूर्वाषाढास्थे ग्रहे पफढाः विद्धा भवन्ति उत्तराभाद्रस्थे ग्रहे थझञा वर्णा विद्धा भवन्ति २४ । २५ कोणस्थेति अत्र चतुःकोणेषु येन नक्षत्रेण न्यस्तमस्ति तत्र ईशानकोणे भरणीकृत्तिके आग्नेये मघाश्लेषे नैर्ऋत्ये विशाखाऽनुराधे वायव्ये श्रवणधनिष्ठे एषु ऋक्षद्वयोर्द्वयोरन्त्यादिपादगतयोर्ग्रहयोर्दृष्टा कोणस्थानां चतुर्णां स्वराणां वेध उत्पद्यते तथा पूर्णातिथीनां वेधः अत्राम्नायः भरणीकृत्तिकयोराद्यन्तचरणस्थो ग्रहः अ उ लृ ओं स्वरान्वेधयति आश्लेषामघाद्यन्तचरणस्थः आ ऊ ॡ औ स्वरान् वेधयति विशाखानुराधाद्यन्तचरणस्थः इ ऋ ए अं स्वरान्वेधयति श्रवणधनिष्ठाद्यन्तचरणस्थः ई ॠ ऐ अः स्वरान्वेधयति चतुःकोणस्था पूर्णातिथीन्वेधयन्ति अथान्यव्याख्याने अस्वरादिचतुष्कस्य वेधः

घङछा रौद्रगे वेधे षणढा हस्तगे ग्रहे पफढाः
पूर्वाषाढायां थझञा भाद्र उत्तरे २४ अवर्णादि
स्वरद्वन्द्वेष्वेकवेधे द्वयोर्वेधः ऋॠस्वरात्मके वेधे
त्वनुस्वारविसर्गयोः २५ कोणस्थापि स्वयोर्मध्ये
अन्त्यादिपादगे ग्रहे अस्वरादिचतुष्कस्य वेधः पू
र्णातिथेः क्रमात् २६ एकादिक्रूरवेधेन फलं तु
संप्रजायते ॥

अआ इई एषां चतुर्णां वेधः यतः एषां केनापि वेधो न संभवति उकारादीनां वेधो वर्णराशिभिः सह वेधो भवत्येव अत एषामवेधनव्याख्याने २६ अथ वेधफलमाह एकादिक्रूरवेधेनेति शन्यर्कराहुकेत्वाराः पंच पापा उक्ताः तेषामेकतमस्य संनाम्नः स्वरवर्णराशिनक्षत्राद्येकतमवेधे उद्वेगो जायते उद्विग्नमना भवति द्विग्रहवेधे भयं भवति परचक्रादितः स्वचक्रादितो वा कस्मादपि भयं भवति त्रिग्रहवेधे भंगः राजादयः संग्रामात्पलायन्ते अर्थवादे अर्थभंगः विद्यावादे विद्याभंगः इत्यादि बोद्धव्यं एकद्व्यादिवेधकल्पना स्वरवर्णादावपि ग्रहेष्वपि विचारः स्वरवर्णनक्षत्रतिथिराशिपंचपापग्रहाणां समासमविचारेणोद्वेगादिफलं यदि एको वर्णादीनां मध्ये एकेन ग्रहेण विद्धस्तदा उद्वेगः कियानपि द्विग्रहवेधे बहूद्वेगः एवं ग्रहसंख्यया उद्वेगस्य विकल्पना तथा वर्णस्वराणां द्विवेधे द्व्यादिग्रहेण तथा भयमपि वदेत् एवं भंगादीनां त्रयाणामेकादिग्रहवेधेन स्व

रवर्णादिषु तथोनाधिक्यंवदेत् २७ यस्मिन्वेधेउद्वेगादीनांविचारस्तमाह
ऋक्षेभ्रमइति तदत्रएकादिग्रहवेधेभ्रमः ज्ञानराहित्यं तदेवोद्वेगः उद्वेगा
दयोभ्रमोभवति वर्णेविद्धेहानिःकार्यादीनांहानिर्विषयादीनांवा स्वरेव्या
धिर्विद्धेसन्तिभवति एवंचतुःपापविद्धेरोगउक्तः चतुर्भिर्ग्रहैःस्वरेविद्धेव्या
धिग्रस्तोभवति अत्रविचारः एकादिवेधेनउद्वेगादयउक्ताः तेनकिंसमुदा
येनापिभवति चतुर्भिर्ग्रहैर्विद्धेस्वरेउद्वेगादिव्याधिपर्यन्तंफलानिभवन्ति
तिथौविद्धेभयंपूर्वमुक्तंद्वाभ्यांवेधेभयं अत्रतिथौवेधेभयं द्विपापवेधेस
तिभयंवाच्यं अत्रापिउद्वेगस्यभयमपि राशौविद्धेमहाविघ्नंमहाविघ्नंमृत्युः
पश्चादुक्तंपंचग्रहवेधेनमृत्युः अत्रराशौविद्धेमहाविघ्नमुक्तंतेनकिं राशेःपं
चपापग्रहवेधात्विघ्नमादेश्यंमृत्युरित्यर्थः पंचविद्धोनजीवति अस्मायम

उद्वेगश्चभयंहानीरोगोमृत्युःक्रमेणच २७ ऋक्षे
भ्रमोवर्णेहानिःस्वरेव्याधिर्भयंतिथौ राशौविद्धेम
हाविघ्नंपंचविद्धोनजीवति २८ एकवेधेभयंयुद्धे
युग्मवेधेपराजयः त्रिवेधेनभवेद्रोगोमृत्युर्वेध
श्चतुष्टये २९ यथादुष्टफलाःक्रूरास्तथासौम्याः
शुभप्रदाः क्रूरयुक्ताःपुनःसौम्यास्तेपिक्रूरफल
प्रदाः ३०

र्थः वर्णादीनांपंचानांवेधेसुतरांमृत्युर्भवति ग्रंथकारस्याभिप्रायोराशेःपंचग्र
हवेधादेवमृत्युरिति २८ विशेषमाह एकवेधेति एकग्रहवेधेयुद्धेभयमादे
श्यं नान्यत्र युग्मग्रहवेधेपराजयः त्रिवेधेसंग्रामात्पलायते चतुर्ग्रहवेधे
मृत्युःसंग्रामेमृत्युर्भवति अत्रापिग्रहसंख्यावर्णादिसंख्याविचारःकर्तव्य
इतिपूर्ववत् २९ अथपापग्रहवेधवशात्शुभग्रहाणांवेधफलमादि
शति यथादुष्टफलाइति यथाएकादिक्रूरवेधेउद्वेगादिफलमुक्तं त
थाएकादिशुभवेधेहर्षलाभसौख्यादिभिःफलंकल्पयेत् अत्रक्रूरयु
क्तोक्रूरएवभवतिक्रूरफलप्रदः अन्यथाशुक्रोन्यथाशुभोपिशुभयुक्तो
त्यर्थंशुभः अत्रयद्यपिनोक्तंपापशुभमिश्रितंफलंवदेत् ऊनाधिक्यंग्र
हवशात् पापाधिकेपापफलमधिकं शुभाधिकेशुभफलमधिकं ३०

॥

॥

॥

यथाभ्रमोऽर्कदेऽङ्गारेऽर्थहानिरित्यादि पृथक्फलमुक्तं तथार्क्यादिवेधे पृथक्फ
न॰ प॰ लमाह अर्कवेधे मनस्तापश्चेति व्याख्या अर्कवेधे सति मनस्तापो भवति कि
टी॰ मुक्तं भवति उद्वेगो भ्रमो नक्षत्रविद्धे तेनार्कनक्षत्रे विद्धे मनस्तापो भवति
४२ उद्विग्नमनाः अङ्गारेऽर्थहानिरुक्ता तेन भौमेन विद्धे अङ्गारे विद्धे द्रव्यहानिर्भवति
एवमुक्तं स्वरे व्याधिः तेन शनिना स्वरे विद्धे रोगवान् भवति राशौ विद्धे महा
42 विघ्नं भवति अत्र राहुकेतू च विघ्नदौ तेन राहुकेतुभ्यां राशौ विद्धे महाविघ्नं
मृत्युः ३१ अथ शुभग्रहवेधफलमाह चंद्रे मिश्रफलमिति चंद्रवेधे सति
मिश्रं फलं पापशुभं क्षीणचंद्रः पापयुक्तः क्षीणचंद्रवेधे पापफलं पूर्णचं
द्रवेधे शुभफलं शुक्रवेधे रतिक्रीडादिसुखादिसौख्यं बुधवेधे प्रज्ञा भवति हे
योपादेयविचारे यथार्थज्ञानं भवति जीववेधे सर्वशुभफलं भवति अभि

अर्कवेधे मनस्तापो द्रव्यहानिश्च भूसुते रोगपीडा
करः सौरी राहुकेतू च विघ्नदौ ३१ चंद्रे मिश्रफलं शु
क्रे रतिलाभश्च भार्गवे बुधवेधे भवेत्प्रज्ञा जीवः स
र्वफलप्रदः ३२ सौम्यपापग्रहौ ह्यन्त्यानाम्नो वापि
धनक्षयः वेधे वैनाशिकर्क्षस्य त्रिवेधे चाशुभो भय
३३ स्वक्षेत्रस्य बलं पूर्णं ६० पादोनं ४५ मित्रभे गृ
हे अर्द्धं ३० समगृहे ज्ञेयं पादं शत्रुगृहे स्थिते ३४

लब्धितं शुभं भवतीत्यर्थः कस्याप्यभिप्रायोऽयं एकवेधेऽर्थनाशश्च स्थानभ्रंशस्त
द्वेधे च नाशश्चोभयवेधेन पापाभ्यां निर्दिशेन्मृतिं ३२ अथ विशेषमाह सौ
म्यपापग्रहेति शुभपापौ यदि नाम्नो वैनाशिकर्क्षे नामनक्षत्रयोर्विंधाति
२३ मं नक्षत्रं वेधयतस्तदा व्याधिधनक्षया भवति वैनाशिकं॰ सामुदा
यिकं सांघातिकं च त्रिविधे मृत्युः ३३ अथ यत्रस्थो ग्रहः स्वल्पमध्याधिकं
पापशुभं ददाति तदाह स्वक्षेत्रस्ये बलं पूर्णमिति स्वक्षेत्रनवांशद्रेष्का
णस्थग्रहे बलं पूर्णं ज्ञेयं मित्रभे मित्रराशौ॰ नवांशे मित्रद्रेष्काणे च
एकेन पादेनोनं कोऽर्थः त्रिचरणं बलं अर्द्धं बलं समगृहे॰ पादं बलं श
त्रुगृहे स्थिते ज्ञेयं इदं सामान्यमुक्तं ३४ ॥

अथविशेषमाह इदंचक्रूरसौम्यानामिति स्वक्षेत्रस्थेबलंपूर्णमित्यादिब
लंबुधगुरुशुक्रपूर्णंचंद्राणांस्थानबलंज्ञेयं एतदेवबलंपापग्रहाणांवि
पर्ययाज्ज्ञेयं तत्रविपर्ययः शत्रुगृहेस्थितेपूर्णंपादोनंसमवेश्मनि
अर्द्धंमित्रगृहेज्ञेयंपादंपापेस्ववेश्मनि विपर्ययार्थःश्लोकेनैवव्या
ख्यातः ३५।३८ अथविचारमाह ग्रहाःक्रूराइति क्षेत्रशब्देनस्थान
मुच्यते बलंज्ञात्वाफलंब्रूयात्स्थानवेधेयथार्थतः स्वगृहंस्थानं
मित्रगृहं समपि शत्रुगृहमपिसमस्थानस्यतेनसमस्थानवक्रमा
र्गोच्चादिगैर्ग्रहस्थानंवेध्यमितिकिं तत्रव्याख्यायते स्वक्षेत्रस्थेनस्था
नबलिनाग्रहेणविद्धेनक्षत्रेवक्रत्वेनाधिकबलिनाग्रहवेधेयत्फलमु
क्तमस्तितत्फलंपूर्णंभवति यथारविणाविद्धेनक्षत्रेसिंहस्थेनस्वस्था
नस्थेनमनस्तापउक्तमनस्तापश्चरणपूर्णोभवति सम्यक्पादफलंभ

इदंचसौम्यक्रूराणांबलंस्थानवशात्समं प
तदेवफलंबोध्यंसौम्यक्रूरेविपर्ययात् ३५ स्था
नवेधसमायोगेयत्संख्यजायतेबलं तत्संख्य
वेधवस्तूनांफलंज्ञेयंविचक्षणैः ३६ ग्रहाःक्रू
रास्तथासौम्यावक्रमार्गोच्चनीचगाः स्थानंच
बोध्यमित्येवंबलंज्ञात्वाफलंवदेत् ३७ ॥

वति स्वक्षेत्रस्थेनगुरुणाचविद्धेसति जीवःसर्वफलमितिपूर्णंफलं पा
पलोपोमतिभ्रमःपूर्णोभवति उद्वेगश्च-भयंच-भंगश्चरोगश्चमृत्युश्च
एतेऽप्यर्थाःपूर्णावाच्याः यस्मिन्यस्मिन्विद्धेभयादयउक्ताःतस्मिन्स्वक्षे
त्रस्थेनग्रहेणविद्धेभयादयःपूर्णावाच्याः स्वक्षेत्रस्थोयदिवक्री-पूर्ण
त्वेद्विगुणं चतुर्भिःपादैःपूर्णःद्विगुणंचतुर्भिःफलं मित्रस्थेनग्रहेण
विद्धेभयाद्युत्पत्तिस्थानंतदाभयादयःपादोनावाच्याः मित्रगेहगोभव
तिमित्रगृहंतदुच्चंचेत् तदानवगुणाभयादयोवाच्याः शीघ्रगानांस्व
भावमेवफलं स्थानवलीशुभःशीघ्रंस्वगृहेपूर्णं मित्रगृहेपादोनामि
त्यादि नीचमेद्वैफलप्रदः मित्रगृहनीचगोभवतितदाशुभंसार्द्धंचर
णफलंपाचयति समगृहेअर्द्धबलं तद्गृहेनीचंचेत्तदापापंफलं
एवंस्वगृहेपिस्थानबलिनांग्रहाणांवक्रादिफलैःसहफलाधिकक
ल्पनांकुर्यात् ३७ ॥

तथा च वक्रग्रहे फलं द्विघ्नमिति ३८ तिथिराश्यंशभानक्षत्रमिति शुभं भो
न·प· ग्यं तथाक्रान्ते विद्धं पापग्रहेण भं शुभाशुभेषु सर्वेषु वर्जनीयं प्रयत्नतः
टी· सुगमं ३९ न नन्दतीति वेधवेलायां वेधकाले कृतविवाहो न नन्दति
४३ शुभं न याति यात्रायां न निवर्त्तते वेधसमये संग्रामादियात्रां न का
र्या न रोगान्मुच्यते रोगी वेधकाले रोगो यदि जायते तदनन्तरं पापवेध
उत्पद्यते ततो रोगी रोगान्न मुक्तो भवति ४० तथा च वक्ष्यति रोगका
लेति सुगमं ४१ वेधस्थाने इति यत्र ग्रामादिस्थाने वेधो भवति तत्र
स्थितिं न कुर्यात् ग्रामादिस्थानस्य स्वरवर्णादिवेधेन तत्र ग्रामे स्थाने स्थि
तिं न कुर्यात् क्षेत्रवेधे तत्र संग्रामं न कुर्यात् तस्मात् भंगो भवति पला

वक्रग्रहे फलं द्विघ्नं त्रिगुणं स्वोच्चसंस्थिते स्वभा
वजं फलं शीघ्रे नीचस्थोऽर्धफलो ग्रहः ३८ ति
थिराश्यंशभानक्षत्रे विद्धं क्रूरग्रहेण यत् सर्वेषु
शुभकार्येषु वर्जयेत्तत्प्रयत्नतः ३९ न नन्दति वि
वाहे च यात्रायां न निवर्त्तते न रोगान्मुच्यते रोगी
वेधवेलाकृतोद्यमः ४० रोगकाले भवेद्वेधः क्रूर
खेचरसंभवः वक्रगस्तु भवेन्मृत्युः शीघ्रे यायी
रुजान्वितः ४१ वेधस्थाने रणे भंगो दुर्गे खण्डिः
प्रजायते कविप्रवेशनं तत्र योधघातश्च तत्र
वै ४२ यत्र पूर्वादिकाष्ठायां वृषराश्यादिगो र
विः ॥

यत्ते ग्रामवेधे ग्रामस्य भज्यते दुर्गं सर्वतोभद्रचक्रं स्थाप्य वेधं विचारयेत्
यद्दिशि नक्षत्रवर्णराशिस्वरवेधस्तत्र खण्डिर्भवति दुर्गं भज्यते तथा वे
यद्दिशि कविप्रवेशनं कुर्यात् योधघातश्च तत्र वै योधनक्षत्रात् न
क्षत्रपुरुषं लिखित्वा यत्राङ्गे नक्षत्रं सर्वतोभद्रे विद्धं भवति तत्र घातं
कुर्यात् ४२ अथ चक्रविचारमाह यत्र पूर्वादीति ईशानस्था इति
वृषमिथुनकुलीराः प्राच्यां तत्रस्थे रवौ प्राचीदिगस्तमिता तिष्ठ
ति सिंहकन्यातुलास्तु दक्षिणास्तमिता तिष्ठति वृश्चिकधनुर्म
कराः पश्चिमायां तत्रस्थे रवौ पश्चिमास्तमिता तिष्ठति कुम्भमीनमे
षा उत्तरस्यां तत्रस्थे रवौ उत्तरादिगस्तमिता भवति ४३ ॥

४४ नक्षत्राद्विशेषमाह नक्षत्राणीति अथ पूर्वस्मात् अउऌएओ एते स्वराः
कृत्तिकारोहिणीमृगशिरआर्द्रापुनर्वसुपुष्याश्लेषासप्तनक्षत्राणि
अवकहडाः पंचवर्णाः वृषाद्यास्त्रयः नंदास्तिथयः रविभौम
वासरौ एते वृषादित्रयमासिके रवावस्तमिताः स्युरिति एवं चतुर्दिक्
नक्षत्राणिस्वरवर्णाराशयस्तिथयोदिशोऽस्तंगताज्ञेयाः ४५ अस्तादि
कस्य पृथक्फलमाह नक्षत्रेत्येति इदमपिफलं पूर्वफलेन सह उ
द्वेगस्त्रभयमित्यादि सह मेलयित्वा फलं ब्रूयात् अस्यार्थोपि न दत्तु

स्यादिशास्तमिताज्ञेयानि स्तः शेषाः सदोदिताः
४३ ईशानस्याः स्वराः प्राच्यां ज्ञेया आग्नेयगा यमे
नैर्ऋत्यस्यास्तु वारुण्यां वायव्यां सौम्यगामताः ४४
नक्षत्राणिस्वरावर्णाराशयस्तिथयोदिशः तेस
र्वेस्तंगताज्ञेया यत्र भानुस्त्रिमासिकः ४५ नक्षत्रे
स्तेरुजोवर्णेहानिः शोकः स्वरेस्तगे राशौ विघ्नं ति
थौ भीतिः पंचास्ते मरणं ध्रुवं ४६ यात्रायुद्धविवा
दे च द्वारं प्रासादहर्म्ययोः न कर्तव्यं शुभं वान्यद
स्ताशाभिमुखं नरैः ४७ अस्ताशायां स्थिते यस्य
यदा नामाद्यमक्षरं तदा तु सर्वकार्येषु त्यक्तव्योदे
वहतो नरः ४८ कवोकोटेन यातु हेहे चातुरंगे म
हाहवे उद्यमोऽस्तंगतैर्येये वर्जनीयो जयार्थिभिः
४९ ॥

गत एव ४६ अथास्तमितायां दिशि क्रियानिषेधमाह यात्रायुद्धेति
अथ श्रेयोसीच्छद्भिः पुरुषैरस्ताशाभिमुखं यात्रा न कार्या युद्धं च न का
र्यं विवादो विद्याविवादः प्रासादस्य द्वारं गृहस्य च एतत्सर्वं अस्ताशाभि
मुखं न कुर्यात् ४७ अथान्यदस्तमितफलमाह अस्ताशायां स्थितमिति
स्तगमं ४८ कवोकोटेति नक्षत्राणिस्वरावर्णाराशयो यस्य यो यस्यास्त
स्तंगता भवंति ते योथा अस्तंगता ज्ञेयाः तैरस्तंगतैर्यैर्येः किं विवर्ज्यं को
टयुद्धं वर्ज्यं द्वंद्वयुद्धं वर्ज्यं विशेषाच्चातुरंगे महाहवे न तिष्ठेत् ४९ ।

न॰ प॰ टी॰ ४४

44

अथानंतरंनक्षत्रस्वरादीनामुदितानांफलमाह नक्षत्रेभ्युदितेति ऋक्षेभ्यु
दितेशरीरपुष्टिः वर्णेलाभः नक्षत्रवर्णस्वरराशितिथिषुपंचसूदितेषु
पदाप्तिः राज्यादिपदप्राप्तिःस्यात् ५॰ अथप्रश्नकालेवेधफलमाह प्रश्न
कालेभवेति सुगमं ५१ ग्रहैरविद्धैरिति यच्चरादिकेलग्नेप्रश्नफलमु
क्तंतद्दैशिकेंद्रेणज्योतिर्विदासर्वैर्ग्रहैरविद्धेलग्नेतुफलंलग्नस्वभावतः
फलंज्ञेयं लग्नस्ययःस्वभावः हृतनष्टादौलाभालाभजयाजये न्वचतुः
पदग्रामारण्यजलराशिस्वभावेनफलंब्रूयात् अथचरादिकेयत्फल
मुक्तंतदाह चरलग्नोदयेनष्टंदुर्लभंरोगिणोमृतिः जातःस्यापिचत
त्रैवस्वल्पमायुर्विनिर्दिशेत् स्थिरलग्नोदयेनष्टंस्वल्पकालेनलभ्यते
तत्ररोगीचिरान्नश्योदीर्घायुश्चभ्रजन्मवत् नष्टस्यपुनःलाभःस्यात्

नक्षत्रेभ्युदितेपुष्टिर्वर्णेलाभःस्वरेसुखं राशौज
याप्तिस्तिथौतेजःपदाप्तिःपंचकोदये ५॰ प्रश्नका
लेभवेद्धित्वंयल्लग्नंक्रूरखेचरैः तद्दुष्टंशोभनं
सौम्यैर्मिश्रैर्मिश्रफलंमतं ५१ ग्रहैरभिन्नेतुयल्ल
ग्नेफलंलग्नस्वभावतः ज्ञातव्यंदैशिकेंद्रेणभा
षितंयच्चरादिकं ५२ क्रूरैरुभयतोविद्धायस्माः
द्वर्णतिथिस्वराः राशिर्धिष्ण्यंचपंचापितस्यमृत्यु
र्नसंशयः ५३ मंडलंनगरंग्रामोदुर्गंदेवालयंपुरं
क्रूरैरुभयतोविद्धंविनश्यतिनसंशयः ५४

रोगीपुनःक्रमेणशोभनः मध्यायुर्लग्नजन्मात् द्विस्वभावोदयेषुयन्त्रित्यादि
चरादिकेरादितं ५२ अथान्यत् क्रूरैरुभयतेति वेधस्त्रिविधउक्तः वामद
क्षिणसन्मुखः उभयदिक्स्थोवामेनविध्यति वामदक्षिणउभयत्रवेधः एवं
सन्मुखदक्षिणउभयदिक्स्थोवेधयति अथवादक्षिणदक्षिणावाउभयत्रवेधः
कस्यापिदिशिकस्मिन्नपिनक्षत्रेमध्यगतिर्ग्रहस्तिष्ठति तत्सन्मुखदिशिन
न्नक्षत्रेसमसूत्रस्यनक्षत्रेऽपरोमध्यगतिर्ग्रहस्तिष्ठति तदानयोःसन्मुख
वेधः एवंक्रूरैरुभयतोविद्धाःपंचवर्णतिथिस्वरादयोयस्यमृत्युस्तस्यसं
ग्रामेमृत्युः तथाजायतेयस्यामृत्युर्भवति ५३ मंडलंनगरमिति क्रूरैरुभय
तोविद्धमिति एवमेवव्याख्यातं अग्रे॰ प्राचकेबोध्यं अपरंसुगमं व

र्णादिपंचकमपि अत्रापि बोद्धव्यं ५४ अथान्यत्रवेधफलमाह कृत्तिका
दीति कूर्मचक्रे कृत्तिकादित्रित्रिकाद्येन नक्षत्रेण देकतमे यदि क्रूरै रुभय
तो विद्धे सति नाभ्यादौ न वयथाविभागोक्तदेशा विनश्यंति तत्र कृत्तिका
दित्रिभे कूर्मनाभौ कृत्तिकादित्रिके क्रूरै रुभयतो विद्धे कूर्मनाभिस्था
देशाः संकेतामिथिलाचंपाकौशांबिकौशिखी तथा अहिछत्रं गया
विंध्यमंतर्वेदिश्च मेखला कान्यकुब्जं प्रयागश्च मध्यदेशो विनश्यती
ति तत्रायमाम्नायः सर्वे देशा विनाशं नयांति किं तु कृत्तिकादित्रिनक्ष
त्रे विद्धे नाभ्युक्तदेशानां मध्ये यस्य यस्य वर्णाः स्वरादयः पंचक्रूरै रुभय
तो विद्धा भवंति स स देशो विनाशं याति अयं विचारः ५५ अथान्यद्वे
धविषयविचारमाह कृत्तिकायामिति अयमर्थः समुदायेन सर्वेषां
न करोति देशो विद्धे न देशग्रामे विद्धे कृत्तिकादिचतुर्षु विद्धेषु ब्राह्म

कृत्तिकादित्रिकाद्ये मे क्रूरविद्धे च कूर्मतः देश
नाभिस्थदेशा याविनश्यंति यथाक्रमं ५५ कृ
त्तिकायां तथा पुष्ये रेवत्यां च पुनर्वसौ विद्धे स
ति क्रमाद्धेयो वर्णेषु ब्राह्मणादिषु ५६ तैलभां
डं रसो धान्यं गजाश्वादि चतुष्पदं सर्वं महर्घतां
याति यत्र क्रूरो व्यवस्थितः ५७ ॥

णादीनां पृथक् नाम्नां वर्णादिपंचके विद्धे फलं वदेत् येयैर्ग्रहैः क्रूरैर्वे
धं क्रियते स स वेधाद्दशरवके तत्तज्जन्मराशिं पश्यति तदा फलं भवति
इदमग्रे विशिष्टोक्तमस्ति यत्र यत्र पापविद्धे विनाशः तत्र शुभद
ष्टे जायते तावक्तव्यास्सर्वा त्रयं तथा हस्ते यत्र ब्राह्मणानां प्रकीर्तितं उत्त
रात्रितयं पुष्यं द्वात्रियाणां विनिर्दिशेत् पौष्णमैत्रं मघा चैव प्राजा
पत्यं विशां स्मृतं आदित्यमाश्विनी हस्तं शूद्राणामभिजित्तथा वि
द्धे रेभिर्द्विजातीनां कारुकाणां च शेषके इति ५६ अथान्यद्विषये कू
रवेधविचारः तैलभांडमिति कूर्मचक्रोक्तप्रतिदेशे देशे क्रूरग्रह
वेधे च तैलभांडं गुडशुंठ्यादि विद्धे सति तद्देशग्रामे सर्वं महर्घं भ
वतीति बहुधनेनापि दुर्मिलं भवति शुभग्रहा विद्धे समर्घं भव
ति स्वल्पधनेन बहु मिलति ५७ ॥

क्रूरवेधेति ५८ अथोपग्रहमाह सूर्यभात्पंचमंधिष्ण्यमिति ५९ केतु
न·प· रिति ८० निर्घातश्चचतुर्विंशोति स्वस्थानेऽइति स्वस्थानात्क्रूरतेवेधंगज
टी· दंष्ट्रानुसारतः विद्युन्मुखादयोष्टावुपग्रहाः सर्वदासर्वकार्येषुविघ्न
४५ दाः परंतुस्थाने एतावतायत्रयत्रोपग्रहाभवंतितत्रतत्रतत्रशुभका
र्येवर्जनीयं एतेउपग्रहाः स्वस्थानस्थागजदंष्ट्रानुसारेणवामेदक्षि
45 णेचवेधंकुर्युः सन्मुखेनवेधयंति विद्युन्मुखोरविर्ज्ञेयः शूलश्चंद्रः प्र
कीर्तितः सन्निपातः कुजोज्ञेयोबुधः केतुः प्रकीर्तितः उल्काज्ञेयासुरा
चार्योवज्रंभार्गवउच्यते कंपः शनैश्चरोज्ञेयोराहुर्निर्घातएवच यथे

क्रूरवेधसमायोगेयस्योपग्रहसंभवः तस्यास्
तुर्नसंदेहोरोगाद्वामरणोपिवा ५८ सूर्यभात्पं
चमंधिष्ण्यंज्ञेयंविद्युन्मुखाभिधं शूलंचाष्टमभं
प्रोक्तंसन्निपातंचतुर्दश ५९ केतुरष्टादशेप्रोक्तो
उल्कास्यादेकविंशतो द्वाविंशतितमेकंपस्त्रयोविं
शेचवज्रकं ८० निर्घातश्चचतुर्विंशेउक्ताह्यष्टावु
पग्रहाः स्वस्थानेविघ्नदाः प्रोक्ताः सर्वकार्येषुसर्व
दा ८१ जन्मभंकर्मप्राधानंविनाशंसामुदायिकं
सांघातिकमिदंधिष्ण्यषट्कंसार्वजनीनकं ८२ जा
तिदेशाभिषेकेषुनवधिष्ण्यानिभूपतेः वेधंज्ञा
त्वाफलंब्रूहिसौम्यैः क्रूरैः शुभाशुभं ८३ जन्मभंज
न्मनक्षत्रंदशमंकर्मसंज्ञकं एकोनविंशमाधा
नंत्रयोविंशंविनाशभं ८४ ॥

नवर्ततेविघ्नपूजांनम्यांतुकारयेत् एतेषांग्रहत्वेनद्वादशारचक्रेदृष्टिर
पिभवति ८१ अथान्यदाह जन्मभंकर्मेति जन्मनक्षत्रादिषट्नक्षत्रंसा
र्वजनीनकंसर्वजनविषयंज्ञेयं यतोजन्मनक्षत्रादिदंप्रोक्तं ८२ अथ
विशेषमाह जातिदेशेति ८३ अधुनातन्नामांकितं जन्मभंजन्मन
क्षत्रंदशमंकर्मसंज्ञकमिति ८४ ॥

अष्टादशं चनक्षत्रमिति ९५ षड्विंममिति स्वगमं ९६ अथैषामशुभयत्र वेधेफलमाह मरणंः स्याज्जन्मभेविद्धेति ९७ सामुदायिकेति ९८ देश र्क्षेति उपग्रहसमायोगात्जननभेविद्धेमरणंः कर्मभेक्लेशमेवचेत्या दियइर्क्षेनस्सर्वमुपग्रहयोगादवश्यमभविष्यतीतिवाच्यं शुभेविद्धे शुभं शुभाशुभैर्मिश्रंफलं जातिभंसंहितायामुक्तमस्ति सर्वात्रयस्सा न्तमग्रजानांराज्ञांतसुमोणसहोत्तराणि सपौस्प्रमेत्रेपिरदैव तंचप्रजापतेर्भचक्रमधीवलानां आदित्यहस्ताभिजिदाश्विनीश्रवणि

अष्टादशंचनक्षत्रंसामुदायिकसंज्ञकं सांघा तिकंचविज्ञेयमष्टांषोडशमत्रहि ९५ षड्विंभ राज्यभंप्रोक्तंजातिनामस्वजातिभं देशभंदेश नामर्क्षंराज्यर्क्षमभिषेकभं ९६ मरणंःस्याज्ज न्मभेविध्येकर्मभेक्लेशएवच आधानर्क्षेप्रवासः स्यात्विनाशंबंधुविग्रहः ९७ सामुदायिकभेवि द्धेहानिःसांघातिकेतथा जातिभेकुलनाशःस्यु र्बंधनेचाभिषेकभे ९८ देशर्क्षेदेशभंगास्युःक्रूरैरे वंशुभेःशुभं उपग्रहसमायोगेमरणंभवतिना न्यथा ९९ भयंभंगास्यवातंश्चमरणंभंगोप्ररस्थि तैः क्रूरैरेकादिपंचानैर्षपिवेधफलंभवेत् १०

राजनेवाम्पमुपागताश्च सार्पविशाखाश्रवणंभरण्यश्चंडालजाते रपिनिर्दिष्टानीत्यादौजातिनक्षत्राणिवोद्धव्यानि जन्मादिषट्नक्ष त्राणिनाडीसंज्ञकानि राज्ञोजातिदेशाभिषेकर्क्षेस्त्रिभिःसह्नवन क्षत्राणिनाडीसंज्ञकानि नाडीनक्षत्रेविद्धेचशुभंकिमपिनकुर्वी त ९९ अथान्यत् भयंभंगास्येति जन्मादिनक्षत्रेएकादिपंचानैः क्रूरैःपुरःस्थितैःसम्मुखवेधकारिभिर्विद्धेसतिभयमादिफलंव देत् एकेनपापेनविद्धेभयंवदेत् द्वाभ्यांभंगःपलायनंत्रिभिर्घा तःचतुर्भिर्बंधःपंचाभिर्मरणंः ॥ १० ॥

न॰प॰
टी॰
४९

46

अथ विद्धे सति कदा फलं तन्निर्णयमाह तिथिऋक्षमिति तिथ्यादिपंचकं शु-
भो वेधयेत् यद्दिने चंद्रः पंचकं विध्यति तद्दिने शुभं वदेत् तिथ्यादिपंचके पा-
पविद्धे चंद्रवेधे सति तद्दिने अशुभं वदेत् ७१ अथार्घं संप्रवक्ष्यामीति स्प-
ष्टं ७२ अथ देशकालवशात् विषयवेधनिर्णयमाह देशः काल इति
वणिजामर्थे देशनिर्णयः कस्मिन् देशे समर्घं महर्घं पण्यं भविष्यति
पण्यानां विक्रयद्रव्यकालनिर्णयश्च कस्मिन्वर्षे समर्घं महार्घं अयने ऋतौ
मासे वा पण्यस्यापि निर्णयः वणिजां त्रयाणामेव निर्णयः ७३ अथ दे-
शानां विभागमाह देशोऽथ मंडलमिति स्पष्टं ७४ धातुर्मूलं चेति धा-
तवः सुवर्णरजतादयः मूलं चंदनागरुजटामांसी सुगंधतृणादयः

तिथिऋक्षं स्वरं राशिं वर्णं चैव तु पंचकं यद्दि-
ने विध्यते चंद्रस्तद्दिने स्याच्छुभाशुभं ७१ अथा-
र्घं संप्रवक्ष्यामि यदुक्तं ब्रह्मयामले एकाशी-
तिपदे चक्रे ग्रहवेधाच्छुभाशुभं ७२ देशः काल-
स्ततः पण्यमिति त्रीण्यर्घनिर्णये चिंतनीयानि
वेध्यानि सर्वकाले विचक्षणैः ७३ देशोऽथ मंडलं
स्थानमिति देशस्त्रिधोच्यते वर्षं मासो दिनं चे-
ति त्रिधा कालोऽपि कथ्यते ७४ धातुर्मूलं च जीव-
श्चेति पण्यं त्रिधा मतं अथ त्रिकत्रिकस्यास्य व-
क्ष्यामि स्वामिविचारान् ७५ देशेशा राहुमंदेज्या
मंडलस्वामिनः पुनः ॥

जीवश्च गजतुरगकस्तूरिकागोवृषभादयः यतः वणिजां लाभार्थं स्वस्वसा-
मर्थ्येन पृथक् पृथक् पण्यं विक्रेतव्यं वा तत्र पृच्छति वणिक् कस्मिन् दे-
शे कस्मिन् काले स्थाने वा धान्यादिपण्यं समर्घं महर्घं वा भविष्यतीति वि-
चार्य कथय अथवा राजादयः पृच्छंति राजा च कस्मिन् स्थाने कस्मिन् का-
ले दुर्गादिकं महत्कं करिष्ये अन्ये च कस्मिन् देशे कस्मिन् काले मया जीव-
नार्थं गंतव्यं वासो वा कारयितव्य इति बहुधा बह्व्यो विकल्पनाः संति ७५
अथ देशादीनां त्रित्रिकानामधिपतीनाह देशेशा राहुमंदेति राहुश-
निबृहस्पतयो देशाधिपाः यथा देशो तीरभुक्तिः मंडलं तत्र लक्ष्मण

वती स्थानेकिंरत्नपुरं अत्रदेशेशाउक्ताः समान्यतः सर्वदेशाधि
पतयः देशराशिवशान्नाधिपतयः तथास्थानकालयोरपि मंड
लाधिपाः केतुसूर्यशुक्राः स्थानाधिपाश्चंद्रभौमबुधाः ७६ अथत्रि
याकालाधिपतीनाह वर्षेशोऽपि ७७ यावीशाःसौरिपाताराइति
अत्रापिस्वभावतोधिपतयः नतुतत्तद्राशिवशात् ७८ पुंग्रहाराः
द्विति संज्ञामात्रप्रयोजनंनतुस्वभावतः ७९ अथग्रहाणांवर्णा
नाह सितेंद्विति देशेशाराहुमंदेज्याइत्यारभ्यस्वगमाप्याः ८० देशा
नांनाथाःपृथक्उक्ताःकस्यापित्रयोधिपतयःकस्यापिद्वौकस्या

केतुसूर्यसिताःस्थाननाथाश्चंद्रारचंद्रजाः ७६
वर्षेशाराहुकेत्वार्कीजीवोमासाधिपःपुनः भौ
मार्कज्ञसिताश्चैयाश्चंद्रःस्याद्दिवसाधिपः ७७
यावीशाःसौरिपाताराजीवेशात्रेंदुसूरयः मूले
शाःकेतुशुक्रार्कीइतिपण्याधिपाग्रहाः ७८ पुंग्र
हाराहुकेत्वर्कजीवभूमिसुतामताः स्त्रीग्रहाशु
क्रशशिनौसौरिसौम्यौनपुंसकौ ७९ सितेंदूसि
तवर्णौशौरक्तेशौभौमभास्करौ पीतौसौम्यगुरू
कृष्णाराहुकेत्वर्कजामताः ८० ग्रहोवक्रोदयेस्वा
श्रोदयेचबलाधिकः देशादीनांसएकैकःस्वा
मीखेटस्तदामतः ८१ वक्रोच्चगःस्वहर्म्यस्थःपूर्ण
वीर्योग्रहोभवेत् मेषोवृषोमृगःकन्याकर्कमी
नतुलाधराः ८२

पिचत्वारः किंसमुदायेनभवंतिकालवशाद्बलवशाद्वाअधिपतयःइ
त्याशंक्याविचारमाह ग्रहोवक्रोदयइति देशेशाराहुमंदेज्येत्यादिषुयो
वक्रीभवतिउदितोभवतिस्वांशोयःस्थितःयत्रकुत्रचिद्राशौस्वगृहेस्वोच्चे
त्यादिलक्षणेनसद्बलेनाधियोभवतित्रयाणांसएवैकदेशादीनांत
दाकालेधिपतिःकल्प्यःअग्रेअन्योयदिबलीभविष्यतितदासएवकल्प्यः
इत्यादिनाअधिपविचारः ८१ अथपुनर्बले विचारयति वक्रोच्चगःस्व

न॰ प॰ टी॰ ४७

हर्म्येस्थितिः स्वगृहे पूर्णवीर्यः वक्री पूर्णवीर्यः उच्चगः पूर्णवीर्यः तत्रापि यदि वक्रीतदाप्यधिकबलः उच्चस्थानादयगे हष्ठस्येवा त्रैराशिकेन बलं कल्प्यं ८२। ८३। ८४। ८५ पुनर्बलविचारमाह उच्चसंस्थेबलं पूर्णमिति नीचराशौ नीचनवांशे शून्यंबलं किं बहुव्याख्यानेन जातकोक्तबलविचारेण॰ जातकपद्धतिबलविचारेण॰ स्थानदिक्कालनिसर्गचेष्टाद्यभेदैर्योबलविचारः स्वोच्चस्वगृहनवांशमित्रवर्गबलविचारेणयोबलीत्रयाणांभवतिसनाथः कल्प्यः द्वावपि बलिनौ तदा द्वावपि नाथौ स्यातां बलाधिक्यात्त्रयोपि स्यात्ताः बलेन देशाधिनाथं ज्ञात्वा फलंव

शादिस्थादिग्रहोच्चास्तुनीचं यत्तस्यसप्तमं परमोच्चादिशो रामा ३ ब्रह्माविंशात्तिथीन्द्रियाः ८३ सप्तविंशास्तथा विंशाः सूर्यादीनां तथांशकाः परमोच्चात्परंनीचमर्धचक्रांतसंख्यया ८४ उच्चान्नीचाच्चयत्तु र्यंसप्तमंस्थानंतदुच्यते तदग्रहष्ठगखेटेबलंत्रैराशिकंमतं ८५ उच्चस्थेचबलंपूर्णंनीचांशस्थेबलंदलं स्ववेत्रस्थेबलंपूर्णपादोनंमित्रभेगृहे ८६ शत्रुंसमग्रहेत्वेयंपादंशत्रुगृहस्थिते त्रैराशिकवशाज्ज्ञेयमन्तरेतुबलंबुधैः ८७ एवंदेशादिनाथायेग्रहावेधेव्यवस्थिताः सुखदःशत्रवोवामध्यास्थितनीयाःप्रयत्नतः ८८ स्वामित्रसमशत्रूणांवेधेदेशादिषुक्रमात्

देत ८८। ८७ अधुनाफलविचारः एवंदेशादिनाथा इति एवमितिवक्रोच्चादिबलविचारेण देशादीनांयेनाथावर्तमानकालेभवंतितेग्रहावेधेव्यवस्थिताः कोर्थः वामसन्मुखदक्षिणदृष्ट्यावेधयितृत्वव्यवस्थिताः तेदेशाधिपादेशस्यवर्णादिपंचकंवेधयंति देशपतिंचदेशनामराशिपतिंवेधयंति तत्रवेधेसमुत्पन्ने॰ वेधकर्तारोदेशाधिपस्यकिंसुखदःशत्रवोवामध्याउदासीनावा इतिप्रयत्नतोविचारणीयाः ८८ अस्मिन्ज्ञातेकिंकर्तव्यमित्याह स्वामित्रसममित्रमिति यदिदेशमंडलग्रामाधिपतयः स्वाधिपतयोभवंति देशपतिर्वेधकर्तायदिदेशराशिपतिर्भवति सचेच्छुभस्तदाचतुर्भिः

पादैः शुभं दशास्य यत्ते मित्रस्थे तदा त्रिभिः पादैः शुभं करोति समस्थे तदा
द्विचरणेन शुभं यत्ते शत्रुस्थे तदा एकेन पादेन एवं वर्षमासदिनानां शु
भग्रहबलविचारेण शुभं तथा यात्रामूलजीवाद्यपि विचारेण स्वमित्रा
दिविचारेण चतुःत्रिद्व्येकपादैः शुभग्रहस्य वेधात् शुभं कल्पयेत् ८९
अथ क्रूरवेधविचारमाह स्वमित्रसमेति क्रूरग्रहस्य विचारोयमेव
स्वगृही एकेन पादेन मित्रगृही द्वाभ्यां समगृही त्रिभिः पादैः शत्रुगृ
ही चतुर्भिः पादैर्वेधात् दुष्टफलं कुर्यादिति ९० अधुना विद्धफलं दृष्टा
प्रमाणयति विद्धस्यादृष्टेति यो देशाधिपतिर्वेधकर्त्ता स्वमित्रादिच
रणफलपाककारी यदि पश्यति तदा येन चरणेन फलं दातृकामः तत्फ
लमवश्यमेव भवति तत्राम्नायः स्वगृहगाश्चतुर्भिः पादैर्वेधे सति फल
पाककारी यदि पश्यति तदा स एव वर्णादिपंचकं स्थानि दृष्टा पश्यति त

शुभग्रहः शुभं यत्ते चतुस्त्रिद्व्येकपादकैः ८९ स्व
मित्रसमशत्रूणां वेधे देशादिषु क्रमात् दुष्टं दु
ष्टग्रहः कुर्यादेकद्वित्रिचतुःपदैः ९० विद्धस्या
दृष्टापादस्तत्पादेन फलं ग्रहः विदध्यात्त्वन्यथा
ज्ञेयं फलं दृष्ट्यनुमानतः ९१ वर्णादिस्वरराशी
नां मेषाद्ये राशिमंडले ग्रहदृष्टिवशात्सोपि वे
धो वर्णादिके मतः ९२

दाय यथार्थत्वेन फलं भवति मित्रगृहगस्त्रिपादेन फलदायी त्रिपाददृष्टा
च पश्यति तदा स्वभावजफलं भवति त्रिपादेनैव फलं परिपश्यते
समगृहस्थो वेधयति तत् द्विपादेन फलं द्विपाददृष्टा च पश्यति
तदा स्वभावतो द्विपादफलं भवति शत्रुगृहगो यदि विध्येत् तदा पा
देनैकेन शुभं एकपादेन पश्यति तदा यथार्थत्वं फलं विशेषो व्याख्या
यते शत्रुगृहस्थो यदि पादेन वेधं फलं सर्वेत्स्थानि दृष्टा पश्यति तदा पा
दं फलं सम्यक् स्यात् वेधदृष्टिवेधयोः समानत्वं ९१ अथ वर्णादिपं
चके ग्रहदृष्टिमाह वर्णादीति मेषाद्ये राशिमंडले द्वादशारचक्रे ग्र
हो यं राशिं एकादिपाददृष्ट्या पश्यति तदा तस्मिन् तस्मिन् राशौ य
द्वर्णादिपंचकमालितत्तद्राशिदर्शनात् तदपि दृष्टं भवति ९२

राशिस्थं वर्णादिपंचकंप्रदर्शीयन्नाह स्वरवर्णाइति स्वरवर्णाः स्वरचक्रे
उक्ताः पंचस्वराथायेस्वरचक्रेयेस्वरवर्णाउक्तास्तेतिथिवेधेपीडिताभ
वंति यथा मगधदेशस्यविचारः मकारोवर्णः वर्णस्वरइकारः नक्ष
त्रंमघा राशिःसिंहः तिथिर्द्वादशीकथमित्याकांक्षायांश्चायेतिथौत्र
योवर्णाइत्याद्यर्थेन एतद्वर्णादिपंचकंस्वरचक्रेउक्तं एतद्वर्णादिपं
चकंस्वस्वतिथिवेधपीडयापीडितंभवति अथपंचस्वदृष्टिःकथंतदे
तमाह तिथिवर्णेभयोराशिस्त्वदृष्टेतद्राशिस्थेतदर्शितंभवति य
थाद्वादशीतिथौमकारोवर्णः द्वादशीतिथिवेधेनमकारोपीडितो
भवति मकारस्यस्वरइकारः एतदुक्तंभवति वर्णादिपंचकंनाम्न
श्चाद्यवर्णान्निरूप्यंते तिथिपीडयावर्णस्वरापीडिताभवंतिवर्णा

स्वरवर्णाःस्वचक्रोक्तास्तिथिवेधेचपीडिताः ति
थौवर्णेचराशौचस्वदृष्ट्यादृष्टिजंफलं ५३
अशुभोवाशुभोवापिशुक्लेविध्यंतिथिंग्रहः स
र्वेनिजफलंदत्तेक्रूरपक्षेत्तनत्फलं ५४ खेट
सौम्यापाकेत्तेयाहृणोदृष्टिःसदाबुधैः दृष्टि
हीनेपुनर्वेधेनस्यात्किंचिच्छुभाशुभं ५५ इत्थं
वेदृष्टिभेदेननिर्दिष्टंसकलंफलं वर्णादिपं
चकेविद्धग्रहोदत्तेशुभाशुभं ५६

दिपंचकेपृथक्वेधःसंभवति एकस्यपृथक्दृष्टिर्नास्ति मवर्णेनस्वर
राश्याद्यानिरूप्यंते वेधकारिभिर्ग्रहैर्द्वादशारचक्रेसिंहराशौदृष्टेविद्धे
वर्णादिपंचकंदृष्टंभवति नपुनर्वर्णस्वराथस्याद्येराशायस्तस्मि
न्नेकतमेदृष्टेवर्णादिपंचकंदृष्टंभवति ५३ अथशुक्लकृष्णविशे
षेणदृष्टिफलंनिरूपयति अशुभोवेति पश्चात्तिथिवेधेनपीडि
ताःशुक्लेःसएवतिथिवेधेशुक्लपक्षेतिथिवेधेनपूर्णफलंभव
ति कृष्णपक्षेऽर्द्धफलं ५४ ग्रहस्यपूर्णदृष्टिलक्षणमाह खेटस्ये
ति ५५ इत्थंवामिति इत्यनेनदृष्टिवेधेननिर्दिष्टंसकलंफलंस्वग्र
हेस्वांशेदृष्टिःपूर्णादृष्टिः अर्धदृष्टेसत्यांफलकल्पनांकरोति
वर्णादिपंचकेति ५६ ॥

सौम्यः पूर्णदृष्टेति सौम्याश्चत्वार उक्ताः बुधगुरुशुक्रपूर्णचंद्राः पापा रवि
कुजशनिराहवः एषां शुभपापानां शुभदृष्टौ विंशोपकान्फलं कल्पयेत्
तत्र चतुर्णां शुभानां पूर्णादिदृष्टिभिः पंच चत्वारः संख्याः पृथक्स्थापनी
याः यदि चत्वारः पूर्णदृष्ट्यैव पश्यंति तदा पंचचतुर्भिर्विंशतिसंख्या भ
वति एवं पापदृष्टावपि ९७ वेधो वर्णादिकेति वर्णादिपंचके यावत्
स्थाने वेधः स्वगृहस्थाः पूर्णदृष्ट्या मित्रगृहस्थास्त्रिपाददृष्ट्या समगृ
हस्था द्विपाददृष्ट्या शत्रुस्थाश्चरणैकेन एवं स्थानवेधो यावत्संख्याभ
वति दृष्टिश्च यावती यावत्संख्या दशमतृतीये नवमपंचमे ९।३।९।

सौम्यः पूर्णदृशा पश्यन्विध्यन्वर्णादिपंचके फ
लं विंशोपकाः पंच क्रूरस्तु चतुरो दिशेत् ९७ वि
धो वर्णादिके यावत्स्थानवेधे च यावती दृष्टिस्त
दनुमानेन वाच्या विंशोपका बुधैः ९८ एवं विंशो
पका यत्र संभवंति शुभाशुभाः अन्योन्यं शोधयेत्ते
षां शेषं तत्र यच्छुभाशुभं ९९ वर्तमानार्घविंशांश
कल्पनास्तेषु चक्रमात् वर्तमानार्घके देया पापा
श्चैव शुभाशुभे ९० देशध्वंसः प्रजापीडा नृपाति
प्रवयस्तथा यत्र दृष्टिस्तु तत्र स्याद्भूमिमंडले
स्फुटे ९१ ॥

कलत्रे च पश्यंति पाददृष्ट्या फला
४ चतुर्थाष्टमे ३।८
निचैवं प्रयच्छंति एषा दृष्टिः अनयोर्वेधदृष्ट्योरनुमानेन बुधैर्विंशोप
काः कल्प्याः शुभस्थानवेधा यावंतः दृष्टिरपि यावती पृथक्कार्या शु
भस्य पूर्णदृष्टिवेधयोर्विंशोपकाश्चत्वारिंशद्भवंति ४० दृष्टिस्थानवेध
योः पादहीना विंशोपकास्त्रिंशत् ३० एवं द्विपादेन विंशत् २० एकपादे
न दश १० एवं शुभानां पृथक्पृथक्कृत्वा एकत्र कार्या पापानामपि पृ
थक्कृत्वा विंशोपकानेकत्र कुर्यात् ९८ ततः किं कार्यमित्याह एवं
विंशोपकेति सुगमं ९९ वर्तमानार्थेति ९० अथ परिशिष्टं यदि पा
पदृष्टिवेधविंशोपकं तत्फलमाह देशध्वंस इति सुगमं ९१ ॥

न॰ प॰
टी॰
४९

49

अकालेपीति १०२ परचक्रेति स्वराजके स्वकुलविग्रहः स्वागमे १०३ भूमिकं
पद्यति १०४ अथशुभानांयदिशेषविंशोपकंतत्फलमाह हस्ताणांजाय

अकालेपिफलंपुष्पंहस्ताणांयत्रजायते स्वजाति
मांसभुक्तिश्चदुर्भिक्षंतत्ररौरवे १०२ परचक्रागम
स्तत्रविग्रहश्चस्वराजके अतोविपर्ययोयत्रदु
र्भिक्षंमंडलेभवेत् १०३ भूमिकंपोरजःपातोरक्त
वृष्टिश्चजायते देशेसर्वसुखोपेतेवेपादेवेव
देहुपः १०४ हस्ताणांजायतेवृद्धिःस्वकालेफ
लपुष्पयोः सुभिक्षंक्षेममारोग्यंप्रजानांतत्रजा
यते १०५ स्वचक्रंपरचक्रंचनकदाचित्प्रजायते
बाधवाःसुहृदस्तत्रशुभानांवेयसंभवे १०६ दी
पोयथागृहस्यांतरूर्ध्वोनयतिसर्वतः तथेदंस
र्वतोभद्रंचक्रंज्ञानप्रकाशकं १०७ विनाबलिंवि
नाहोमंकुमारीपूजनंविना शुभग्रहंविनादेविच
क्रराजंनवीक्षयेत् १०८ अविचार्यतथापृच्छेत्पृ
च्छकःकथकस्तथा द्वाविमौविघ्नदौप्रोक्तावत्रदे
विनसंशयः १०९ जातकेचतिथिंराशिंविज्ञेयं
नायतोज्वलो अज्ञातजातकानांतुसमस्तमभि
धानतः ११० विस्तारेणमयाख्यातेयथोक्तंब्रह्मया
मले नदेयंयस्यकस्यापिचक्रमेतत्सुनिश्चितं १११
इतिब्रह्मयामलेनरपतिजयचर्यायांस्वरोदयेस
र्वतोभद्रचक्रंसमाप्तम् अथस्थानपदचक्रं ॥

तेवृद्धिरिति १०५ स्वचक्रमिति १०६ दीपोयथेति १०७ । १०८ । १०९ । ११० । १११
इतिनरपतिजयचर्यास्वरोदयटीकायांजयलक्ष्म्यांसर्वतोभद्रचक्रं अथस
चक्रंस्थानपदमिति भानांकुजिकादीनांतेषांपादाःद्वादशाधिकस्थाने ११२

तत्संभवं प्रस्तानपदचक्रं वक्ष्यामि नामादीति १ अथ चक्रन्यासमाह तिर्यगू
र्ध्वगतेति २ न्यसेदिति चतुर्दिक्षु ईशानादिकोष्ठमादिं कृत्वा पंचपंचकोष्ठे
षु अवकहडान् वर्णान्विन्यसेत् अवकहडा ईशाने मटपरता आग्नेयको
ष्ठपंचसु नयभजखा नैर्ऋत्यादिपंचसु कोष्ठेषु गसदचला वायव्यादि
कोष्ठेषु पंचसु ३ पुनः किं कुर्यादित्याह पंचस्वरेति अइउएओ पंचस्वरैः
सह अवकहडादीनां पंचवर्णानां पृथक् पृथक् पंचभिः स्वरैः संयोगं कु
र्यात् तत्र अवकहडादीनामादौ अकार एव वर्णरूपस्तस्य पंचभिः स्वरैः
संयोगे पंचस्वरा एव भवंति अइउएओ अकारात्परो वकारः पंचस्वरैः

चक्रं प्रस्तानपदं वक्ष्ये भूपादाक्षरसंभवं नामादिव
र्णतो ज्ञेया अक्षरा धूपशाकास्तथा १ तिर्यगूर्ध्व
गता रेखाः कुर्यात्संख्याः लिखेद्बुधः जायन्ते कोष्ठका
नां तु प्रस्तानमेकेन संशयः २ न्यसेदवकहडादीनि
ईशादि विदिशि क्रमात् पंचपंचक्रमेणैव शुद्धव
र्णान्नियोजयेत् ३ पंचस्वरसमायोगादेकैकं पंच
धा कुरु कुर्यात्कुघुभुङुस्थाने त्रीणि त्रीण्यक्षराणि
च ४ कुचङछ भवेत्तत्र भैरोद्रेषीशानगोचरे ष
णढ भवेत्तत्र हस्ते आग्नेयसंज्ञके ५ ॥

संयोगे व वि वु वे वो इति पंचधा जाताः वकारात्परः ककारस्य पंचस्वर
संयोगे क कि कु के को पंच ककाराः ककारात्परो हकारस्य पंचस्वरसं
योगे ह हि हु हे हो पंचधा जाताः हकारात्परस्य डकारस्य पंचस्वरसं
योगे ड डि डु डे डो पंचधा जाताः एवं कृते अवकहडादीनां पंचविंश
तिसंख्या जाता २५ एवं मटपरतादीनामाग्नेयादिस्थितानां पृथक्
पंचविंशतिः २५ स्वरवर्णसंयोगात्संख्या जायते तत्कृते प्रस्तसंख्या
भवति वर्णानां १०० कुघुभुङुस्थाने इति कुवर्णस्य चङछा त्रयो वर्णा
देयाः घुवर्णस्य स्थाने षणठ भुवर्णकोष्ठे धफढाः ङुवर्णस्य स्था
ने थझञाः एवं कृते प्रस्तारीयपदचक्रवर्णा जायन्ते ४ श्लोकेनाह
कुचङछ भवेदिति ५ ॥

न.प.
टी.
५.

फल्गुनाः प्रथमेति ९ आर्द्रा हस्तेति एवं स्तंभचतुष्कमिति पूर्वपदं चउत्तर
पदं च ते पूर्वोत्तरपदे ते प्राकृत्यस्याषाढस्यः ते पूर्वाषाढोत्तराषाढे तद्व
त्रे पतंच चतुष्कं स्तंभतत्त्वं सर्वत्र बोद्धव्यं कोटादिस्थानचक्रे ७ अथ
द्वादशाधिकस्थानैर्वर्णैः किंकुर्यादित्याह धिष्ण्यानि कृत्तिकादीनीति
अइउएओववि वुवेवोककीकुकेकोहहिहुहेहोडडिडुडेडो एषां पंचविं
शतिपदचक्रं ॥

50

पफल्गुनाः प्रथमाषाढे स्तंभे नैकं स्यगोचरे डु
स्थाने प्यकमावापो स्तंभ उत्तरभाद्रके ९ आर्द्रा
हस्तस्तथाषाढ पूर्वोत्तरपदाभिधे एवं स्तंभ
चतुष्कं च त्तानवं स्वरवेदिभिः ७ धिष्ण्यानि कृ
त्तिकादीनि प्रत्येकं चतुरक्षरैः साभिजित्यष्टा
कालस्यस्थाने कद्वादशाधिके ८ ॥

ष्टाति वर्णानां चतुर्भिश्चतुर्भिर्वर्णैः कृत्तिकादीनां चरणाः कल्प्याः
नक्षत्रचरणा एवांशकाः तत्र अइउए वर्णाश्चत्वारः क्रमेण कृत्तिकाच
रणाः ओववि वु वर्णा रोहिणी चरणाः वेवोकाकी वर्णा मृगशिर
श्चरणाः पश्चात् कु वर्णास्यघ ङ छा वर्णा दनाः तेश्चतुर्भिर्वर्णैरा
र्द्रानक्षत्रस्य चरणाः केकोहहि पुनर्वसु चरणाः हुहेहोड वर्णाः पु
ष्य चरणाः डिडुडेडो आश्लेषायाः एवं दक्षिणादिदिक्स्थितैर्वर्णैः स्तं
भवर्णा सहितैर्मघादीनां नक्षत्राणां साभिजितानां चरणाः कल्पि

ताः संति ऋक्षपादवर्णाः एवं शाकाः शतपदचक्रे स्वस्वकोष्ठे स्थिताः से
ति ॥ संचारवशात्तत्रस्थे पापग्रहफलमाह यदंशाककोष्ठस्थ इ
ति ॥ पुंसो नामाद्यमक्षरमिष्टं पलक्षणं मनुष्यादि सर्वसत्वदेशादी
नामाद्यमक्षरं वेधयेत् ॥ सौम्यवेधेति निर्वेधे शुभाशुभं न भवती
त्यर्थः ॥ यडक्रं सर्वतोभद्रेति ॥ इति शतपदचक्रं व्याख्यातं द्विती
यं शताचक्रं ॥

यदंशाककोष्ठस्थः क्रूरः सौम्योपि वा ग्रहः
ततस्थं हेययेतिर्यक् पुंसो नामाद्यमक्षरं ॥
सौम्यवेधे शुभं ज्ञेयमशुभं पापखेचरैः मिश्रे
मिश्रफलं तत्र निर्वेधे न शुभाशुभं ॥ यडक्रं
सर्वतोभद्रे ग्रहोपग्रहवेधनः शुभाशुभफले
सर्वं तदेहापि विचिंतयेत् ॥ इति यामलीयेन
रपतिजयचर्यायां स्वरोदये शतपदचक्रं स
मातम् ।

यं २ ॥

न॰ प॰ अष्टाविंशोर्ध्वगेति रेखाः समाः किंचित्कोणोपरिगताः यथा तद्रेखोपरि
टी॰ द्वादशाधिकशतं कृत्तिकादीनां चरणा वर्णाश्च अइउए कृत्तिकायां लिखेत्
५१ १ तदर्थमाह कृत्तिकादीनीति २ योग्रह इति ३ अथ वेधमाह आद्यां
51 शेनेति अयमर्थश्चक्रे ज्ञातव्यः ४ यस्य नामाद्यक्षरमिति ५ क्रूरो भयस्थि
तेति ६ वेधबंधेति यच्चरणं भयतो पापविद्धस्तस्मिन् चरणे पाणि
ग्रहादिर्वा भवंति ७ अत्रांशाकचक्रवेधसामर्थ्यमाह अद्रयः साग

अष्टाविंशोर्ध्वगा रेखा अष्टाविंशति तिर्यगाः अं
शाचक्रं भवेत्सैवं यड्क्रमादियामले १ कृत्तिका
दीनि भान्यत्र पादाक्षरक्रमेण च साभिजिंति न्य
सेत्सर्वाण्यष्टाविंशतिसंख्यया २ योग्रहो यत्रनक्ष
त्रांशे तेन तत्रैव न्यसेद्बुधः वेधयेत्सम्मुखं वर्णं क्रू
रो वाप्यशुभोपि वा ३ आद्यांशेन चतुर्थांशं चतु
र्थांशेन वादिमं द्वितीयेन तृतीयं तु तृतीयेन द्वि
तीयकं ४ यस्य नामाक्षरं विद्धं मेषाचक्रे ग्रहेण
तु क्रूरैरिष्टशुभैर्हानिर्द्धाम्यैः सौख्यं न संशयः ५
क्रूरो भयस्थिते वेधे मृत्युर्विघ्नं शुभाशुभैः शुभो
भयगते वेधे व्याधिः पीडा च बंधनं ६ वेधबंध
विवाहे च यात्रायां न निवर्तते रोगो मृत्यू रणे भं
गः क्रूरवेधेन संशयः ७ अद्रयः सागरा नद्यो दे
वग्रामपुराणि च क्रूरवेधे विनश्यंति नात्र का
र्या विचारणा ८ चंद्रनक्षत्रांशाके वेधो भवेद्यद्य
परग्रहैः तस्मात्तद्दिनं वर्ज्यं सर्वदा शुभकर्मणि ९

रा इति यत्र चक्रे क्रूरवेधे पर्वता याश्चापि नश्यंति तत्र मनुष्यादीनां का वा
र्तेति सर्वतोभद्रशांतपदांशाके षुत्र ये षु यस्य वर्णादिपंचकं विद्धं पर्वता
दि नष्टमवश्यं भवति ८ चंद्रनक्षत्रांशाक इति चंद्रो नक्षत्रचरणस्थ एव
कार्यकाले अंशं वेधयति तस्मिन्नपि यद्यपरग्रहस्य वेधो भवति तदा
तद्दिने तद्दृत्तपादं शुभकर्मणि वर्जयेत् ९ ॥

इतिश्रीहरिवंशमहादेवविरचितायांजयलक्ष्म्यांस्वरोदयटीकायां
अंशचक्रेसमाप्ते आदौचक्रमिति १ अश्विन्याद्यमिति अश्विन्याद्यंनव
नक्षत्रात्मकंचक्रमुत्तरस्यांदिशिस्थितंवर्तते मघाद्यंनवनक्षत्रात्म
कंपूर्वस्यांदिशिस्थितं मूलाद्यंनवनक्षत्रात्मकंदक्षिणस्यांदिशिस्थि
तं छत्रत्रयस्यायंविभागः तत्रछत्रेषुत्रिषुबलनामायन्त्रपतयःस्थि
ताः तेषांनामपृथक्बलनामभिरेवव्याख्यातं तेषांबलानांनाम आ
द्यंबलमश्वाः तदनंतरंगजाः ततःपरंपदातयः तत्राश्वनामाद्यबल
त्वेकथं तथाचनकुलविरचितशालिहोत्रे तस्यराज्ञोयशोलक्ष्मीधर्म

नरपतिछत्रचक्रम् ॥ गजपतिछ० ॥ अश्वपतिछत्रच० ॥

इतिनरपतिजयचर्यायांस्वरोदयेअंशस्वरचक्रे
अथवामरचक्राणि आदौचक्रेसमालिख्यछत्र
त्रयस्यशोभनं अश्विन्यादिन्यसेत्तत्रसम्यग्विभा
तिभानिच १ अश्विन्याद्यंमघाद्यंचमूलाद्यंचक्र
मेणच उत्तरेपूर्वदक्षेचपतच्छत्रत्रयंमतं २ ॥

कामार्थसंपदः वाजिनोयस्यतिष्ठंतिसर्वलक्षणलक्षिताः तथाचलक्ष्मी
वाक्यं एकाहमपियस्याश्वानिवसंतिगृहांगणे विश्वोर्वशस्यलभ्यका
लक्ष्मीस्तस्यगृहेस्थिरं तथाश्वेभ्योहीनबलेगजाःकथं तत्समर्थयन्त्वा
ह शुद्धांतेतावन्मातंगाभिन्ननीलेंद्रसन्निभाः दुर्जयादुर्निवाराश्चपाद

न॰प॰
टी॰
५२

52

रथैस्तुरंगमैः तेभ्यो गजेभ्यो हीनाश्च सैन्यपदातयो नराः तत्राश्वा अश्वि
न्यादिनक्षत्रसमाश्रिताः गजाश्च मघादिक्षत्रे स्थिताः नराश्च मूलादिक्ष
त्रे स्थिताः अयं विभागो यामलादिषु सर्वेषु २ अथ त्रयाणां चतुर्दिक्षु वि
भागप्रवर्तनमाह प्रतीचीमध्यरेखेति अत्रोदाहरणे भूविभागः तथाच
राजविजये अश्वाधिपो गजाधिपो नराधिपस्तु क्रमेणच एषां छत्रवि
धानेन ज्ञातव्यं नृपतित्रयं अत्रार्थे विजयकल्पलतायां चक्रपाणिः छ
त्रे तुरंगोत्तरदिक्पतेश्च दस्रान्तवोडूनि भवंति चक्रे पिशाङ्गजः प्राच्य
धिपस्य रक्षोधिपस्यान्त्यमनुष्यांतकदिक्पतेश्च अतो अश्वपति गजपति नर
पतयो राजानः प्रस्थिताः इदं छत्रत्रयं संज्ञामात्रं अथ प्रतीचीमध्यरे
खा किंपदवधिभूतां के देशं प्राप्य निहत्ता तत्र कूर्मचक्रे देशविभागः
अयोध्या मिथिला चंपा कौशांबी कौशिकी तथा अहिछत्रं गया विंध्य
मंतर्वेदिश्च मेखला कान्यकुब्जं प्रयागश्च मध्यदेशो विनश्यति एषु
देशेषु यत्र कौशिकीनदी तत्र रेखा प्रतीची स्थिता तद्रेखोत्तरभागे ईशा
नांते हयाधिपः कौशिकीतश्चाग्नेयांतं मध्यरेखातो दक्षिणे आग्नेयांते
नराधीशः तन्मध्ये कौशिक्या ईशानाग्नेयांतराले मघादिक्षत्रे तु गज

प्रतीचीमध्यरेखाग्रादीशानांते हयाधिपः ॥

पतिश्छत्रे तन्मध्ये च गजाधिप इति अथ प्रतीचीमध्यरेखाया उत्तरे ई
शानांते सपश्चिमार्द्धवायव्योत्तरेशानांते बहवो राजानः तथाच पश्चि
मे शाककौंकणम्लेच्छहैहयपुलिन्दकाः वायव्यां दिशि माण्डव्यतुषारैक
विलोचनाः स्त्रीराज्यापमकदीर्घस्यमूलिकाश्च मेरजिकाः उत्तरस्यां तु
धारादि हूणयामुनकैकयाः गांधारमद्रयौधेयार्जुनायनवसातयः
ऐशान्यां कीरकाश्मीरगजतंत्रवरमानकं स्वसेकपदकौलिंदद्रासर
कटंगणाः एषां योधिपतिः सोश्वपतिः तस्य छत्रमश्वपतिछत्रं अथ
पश्चिमार्द्धनैर्ऋत्यदक्षिणाग्नेयांते च राजानः तत्र नैर्ऋत्यां नैर्ऋत्यादि
शि कांबोजद्राविडावनितामताः सुराष्ट्रयवनाः संति सिंधवनकचर्च
राः अथ दक्षिणस्यां दिशि पुष्पनकस्य रजनीचरराजधानी श्रीपर्वतो मल
यदर्दुरकौ महेंद्रः कर्नाटकोल्लगिरिकेरलारिष्यमूकाभीरचोल
वनवासिमहाराष्ट्राश्च अथाग्नेयां स्याककुभ्याज्यभुजः कलिंगवं
गोपवंगाप्रविदर्भवत्साः सकोसलोड्डलिकुरुपालविंध्यालालजि
कपावसुक्ताः आग्नेयांतमेते देशाः एषां योधिपतिः स नरपतिः

तस्यछत्रंनरपतिछत्रं सर्वंदक्षिणेप्यत्रवदंति तथाग्नेयेपूर्वांतराले प्रा
च्यांकौशिकीनदीतस्याःप्राक्दिशिसगौडहालिबंधश्चपंचराष्ट्रंचकामरू
स्तनरैववनेवासाःसर्वेस्यादिशिसंस्थिताः प्राक्जोतिषालौहित्यक्षी
रोदसमुद्रऋषभादाः उदयगिरिभद्राश्वगौडपौंड्रोत्कलकाशिमेक
लांबष्ठाः एकपदताम्रलिप्तककोमलकावर्द्धमानाश्चेति एषांयो
धिपतिःसगजाधिपतिः अत्रकेपिवदंति कवितातस्यसंमुखेनैवउ
त्तरस्यामीशानांतेहयाधिपःदक्षिणस्यामाग्नेयांतेनराधिपः तन्म
ध्येतुगजाधिपइति अतएवास्माभिर्व्याख्यातं यत्रकुत्रापिदेशेसंस्थि
तानांराज्ञांनामनक्षत्रेणतत्तत्संज्ञानक्षत्रज्ञापनार्थंछत्रत्रयसंज्ञाकृ
ता ३ तथाचाह अन्येषांभूभृतामिति अन्येषांयत्रकुत्रचित्स्थितानां

आग्नेयांतेनराधीशस्तन्मध्येचगजाधिपः ३ अ
न्येषांभूभृतामस्तेयत्रछत्रेव्यवस्थिते तच्छत्रंत
स्यभूपस्यशुभाशुभफलप्रदं ४ चामरेकलशावी
णाछत्रंदंडपताकहरूः आसनंकीलकेरज्जुर्नवभे
दाःप्रकीर्तिताः ५ छत्रत्रयेस्थितःसौरिर्भगांतस्य
विनिर्दिशेत् फलंचचामरादीनांप्रत्येकंचवदा
म्यहं ६ चामरेचंडतावायोरनावृष्टिश्चजायते
दुर्भिक्षंचभवेत्घोरंप्रजापीडानसंशयः ७ ॥

राज्ञोनक्षत्रंयस्मिन्कस्मिन्नपिछत्रेस्थितंभवतितच्छत्रसंज्ञया तस्या
पिछत्रंभवति ४ अथछत्रत्रयस्यनवनक्षत्राणांसंज्ञामाह चामरेक
लशेति तत्राश्वपतिछत्रेऽश्विनीचामरसंज्ञिता भरणीकलशसंज्ञि
ता कृत्तिकावीणा रोहिणीछत्रं मृगशिरोदंडसंज्ञः आर्द्रापताकहरूः
पुनर्वसुरासने कीलकंपुष्यः अश्लेषारज्जुः नवनक्षत्राणामेवंन
वभेदाः तथामघादीनांनवानांक्रमेणचामरादिनवभेदाः नरपति
छत्रेमूलानांचनवानांचामरादिनवभेदाज्ञातव्याः ५ तत्रशनिभौ
मगतानामेषांपृथक्पृथक्फलमाह छत्रत्रयेस्थितेति छत्रत्रये
छत्रेदंडेपताकहेनक्षत्रत्रयेयदासौरिर्विचरतितदातस्यछत्रभंग
मादिशेत् ८ अपरेषांफलंकविरेववदति शनिचारवशात् चामरे
ति ७ ॥

न॰ प॰
टी॰
पत्र

53

कलशस्येति ८ वीणास्येति ९ यदाऽच्छत्रयेति १० आसनस्येति आस
नस्य आसनाख्यनक्षत्रस्य सप्तमनक्षत्रे आसनस्य नाशो भवति कोऽर्थः ए
पिवीत्यजेत् परचक्रादिभिः कीले कीलाख्यनक्षत्रस्य शनौ युवराजना
शः जीवन्नपि नरियो राजा युवराज इति स्मृतः रज्जुसंज्ञे नवमनक्षत्रे श
नौ बंधनं भवति स्वचक्रेण परचक्रेण वा छत्रत्रयादिनक्षत्रे शनौ स्थिते
यत्फलमुक्तं तन्नक्षत्रं सर्वतोभद्रे यदि विद्धं भवति तदा अवश्यं भवति
तच्चापि निरूपणीयमित्युपदेशः ११ अथ शनेः फलाफलदाने विशे
षमाह सौम्ययुक्तेति यदा छत्रत्रये सौरिः छत्रे दंडे पतन्नहे इत्यादिना

कलशस्थे भवेद्युद्धं रणे रोगो महद्भयं चामरा
नादिकं सर्वं जायते नात्र संशयः ८ वीणा
स्थेनार्कपुत्रेण पट्टराज्ञी विनश्यति चलचि
त्तो भवेद्राजा भयभीता च मेदिनी ९ यदाऽच्छ
त्रये सौरिश्छत्रे दंडे पतन्ग्रहे तदा तस्य भवेद्भं
गः छत्रस्यापि न संशयः १० आसनस्य भवेन्ना
श आसनस्थे शनैश्चरे युवराजक्षयः कीले
बंधनं रज्जुसंस्थिते ११ सौम्ययुक्तोऽतिचारस्थः
शनिः क्रूरफलो न हि वक्रगः क्रूरसंयुक्तः श
निः क्रूरफलप्रदः १२ ॥

छत्रभंगफलं चामरे चंडना वायोरित्यादिः शनियुक्तनवनक्षत्रफलमु
क्तेनेऽत्यर्थं यदि शुभग्रहयुक्तो भवति गुरुशुक्राभ्यां युक्तः अतिचार
स्थोऽतिशीघ्रगत्या स्वकालपरिमाणराशिभोगमतिक्रम्य राश्यंतरं ग
त्वा कामयवं विशिष्टः शनिकृतफलकर्त्ता न भवति ईदृशो शनौ चाम
